In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला - 87

दयानन्दगैर्वाणी

(द्विदिवसीयायां "संस्कृतक्षेत्रं प्रति स्वामिदयानन्दसरस्वतीनां योगदानमिति" राष्ट्रियसङ्गोष्ठ्यां समर्पितपत्राणां सङ्कलनम्)

कृण्वन्तो विश्वमार्यम्

प्रधानसम्पादकः
आचार्य टि. केशवनारायणः
निदेशकः

सम्पादिका
डा. के. वरलक्ष्मीः
उपनिदेशिका

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः
हैदराबाद्
2011

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थावली – 87

दयानन्दगौर्वाणी

(द्विदिवसीयायां "संस्कृतक्षेत्रं प्रति स्वामिदयानन्दसरस्वतीनां योगदानमिति" राष्ट्रियसङ्गोष्ठ्यां समर्पितपत्राणां सङ्कलनम्)

प्रधानसम्पादकः
प्रा. टि. केशवनारायणो वेदालङ्कारः
निदेशकः

सम्पादिका
डा. के. वरलक्ष्मीः
उपनिदेशिका

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानियाविश्वविद्यालयः, हैदराबाद्
2011

In Public domain. Digitization Muthulakshmi Research Academy

पुस्तकमिदं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य मानितविश्वविद्यालयस्य राष्ट्रियसंस्कृतसंस्थानस्य द्रव्यानुदानेन प्रकाशितम्।
ISBN No. 978-93-80171-22-7

प्रधानसम्पादकः - निदेशकः, संस्कृत अकादमी
पुस्तकप्रकाशनसम्पादिका - डा. के. वरलक्ष्मीः, उपनिदेशिका

सर्वेऽधिकाराः - संस्कृत अकादमी

प्रथममुद्रणम् - 2011
प्रतयः - 100
मूल्यम् - 150

पुस्तकप्राप्तिस्थानम् - संस्कृत अकादमी
आदर्शशोधसंस्थानम्
उस्मानियाविश्वविद्यालयः
हैदराबाद् – 500 007
दूरवाणी- 040–27070281
email: sanskritacademyhyd@gmail.com
मुद्राणालयः - Sandeep Graphics, Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series - 87

Dayananda Gairvani

(Proceedings of two-day National Seminar on "Contribution of Swami Dayananda Saraswati to Sanskrit Studies")

Chief Editor
Prof. T. Kesavanarayana Vedalankar
Director i/c

Editor
Dr. K. Varalakshmi
Deputy Director

SANSKRIT ACADEMY
Adarsh Shodh Sansthan
(Recognised by Rashtriya Sanskrit Sansthan)
Osmania University
Hyderabad – 500 007
2011

In Public domain. Digitization Muthulakshmi Research Academy

This book has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, Deemed University, Ministry of Human Resource Development, Govt. of India, New Delhi.

ISBN No. 978-93-80171-22-7

Publisher & Chief Editor: The Director, Sanskrit Academy
Editor: Deputy Director, Sanskrit Academy

Copy rights reserved with Sanskrit Academy
First Edition – 2011
Copies: 100
Price: Rs. 150/-

Copies can be had from: Sanskrit Academy
(Adarsh Shodha Sansthan)
Osmania University
Hyderabad – 500 007
Phone No: 040-27070281
email: sanskritacademyhyd@gmail.com

Printers: Sandeep Graphics, Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

प्राक्कथनम्

एकोनविंशतिशताब्दस्य सङ्घसंस्कर्तृषु महर्षेः दयानन्दस्य प्रथमं स्थानं वर्तते। दयानन्दस्य विषये अयं श्लोकः सम्यक् समन्वेति-

नत्वहं कामये राज्यं न स्वर्गं न पुनर्भवम्। कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्।।

सुसम्पन्नपरिवारे समधिगतजन्मापि दयानन्दः सर्वं परित्यज्य वैराग्यभावनया समसामयिकसमाजे विद्यमानानाम् आध्यात्मिक-सामाजिकानाञ्च दोषाणाम्, अन्धविश्वासानाञ्च निवारणाय जीवनं समर्पितवान्। भारतीयसमाजस्यात्मा वेदः। तस्मात् भारतीयसमाजे समुद्भूतानां समस्यानामपि समाधानं वेदः एव भवितुमर्हतीति दयानन्दस्य प्रबलविश्वासः आसीत्। तस्मात् वेदानां समुद्धरणं तेषां प्रचार-प्रसार एव स्वजीवनस्य लक्ष्यमिति सङ्कल्पितवान्। तदर्थं सायण-महीधरोव्वटादिभिर्मध्यकालीनैराचार्यैः कृतानि वेदानां व्याख्यानानि तिरस्कृत्य तेषां वैज्ञानिकम्, आर्षपरम्परानुरूपञ्च व्याख्यानं चकार। तत्प्रयत्नान्तर्गतमेव आर्यसमाज इति नाम्ना एकां संस्थामपि संस्थापितवान्।

अद्यापि भारतीयसमाजः बहुभिः समस्याभिः परिपीडितः वर्तते। तस्मादद्यापि दयानन्दोपदिष्टस्य मार्गस्य प्रासङ्गिकतां मनसि निधाय, भारतीयसमाजाय, संस्कृतवाङ्मयाय च दयानन्दस्य योगदानविषयिणी चर्चा उपयुज्यत इति भावनया च संस्कृतपरिषदा द्विदिवसीया सङ्गोष्ठी समायोजिता। तस्यां बहुभिः प्रामाणिकैराचार्यैः पण्डितप्रकाण्डैश्च शोधपत्राणि समर्पितानि। तानि पुस्तकरूपेण प्रकाश्यन्त इति महान्तमानन्दमनुभवामि।

सङ्गोष्ठीसमायोजनार्थं पत्रप्रकाशनार्थञ्च अनुदानप्रदातृभ्यः परमादरणीयेभ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः आचार्यराधावल्लभत्रिपाठिमहोदयेभ्यः, कुलसचिवेभ्यः आचार्यसुब्बरायुडुमहोदयेभ्यः निरन्तरप्रोत्साहनेन सहकृतवद्भ्यः उस्मानियाविश्वविद्यालयस्य उपकुलपतिमहोदयेभ्यः आचार्य एस्. सत्यनारायणमहाभागेभ्यः, कुलसचिवेभ्यः आचार्य वि. किशनरावमहोदयेभ्यश्च सश्रद्धं हार्दिकं कार्तज्ञं वितरामि। संस्कृतपरिषदः हितकाङ्क्षिभ्यः सुहृद्भ्यः संस्कृतविभागस्य प्राचार्येभ्यः सर्वेभ्यश्च सस्नेहं धन्यवादान् निवेदयामि।

सङ्गोष्ठ्याः सफलनिर्वहणाय, ग्रन्थस्य कुशलसम्पादनाय च डा. के. वरलक्ष्मीमहोदयां सानन्दमभिनन्दामि। कार्यस्यास्य साफल्ये सहकृतवद्भ्यः परिषदः बोधन-बोधनेतरकर्मकर्तृभ्यश्च सर्वेभ्यः साधुवादान् वितरामि।

आचार्य टि. केशवनारायणो वेदालङ्कारः

प्रधानसम्पादकः

In Public domain. Digitization Muthulakshmi Research Academy

II. Vedanga Prakash (set of 16 books) 1. Varnoccharan Shiksha (1879) 2. Sanskrit vakyaprabodhini (1879) 3. Vyavaharabhanu (1879) 4. Sandhi Vishay 5. Namika 6. Kaarakiyah 7. Saamaasika 8. Taddit 9. Avyayaartha 10. Aakhyatika 11. Sauvar 12. Paaribhaashika 13. Dhatupata 14. Ganapaata 15. Unaadi kosh 16. Nighantu

III. 1. Gautama Ahilya ki katha (Unavailable) (1879) 2. Brantinivaran (1880) 3. Bramocchedan (1880) 4. Anubramocchedan (1880) 5. Gokarunanidhi (1880) 6. Chaturved Vishay Suchi (1971) 7. Gadarbh taapni Upanishad (as per Babu Devendranath Mukhopadhyay) (Unavailable) 8. Hugli Shastrarth tatha pratima pujan vichar (1873) 9. Jaalandhar Shastrarth (1877) 10. Satyasatyavivek (Bareily shastrath) (1879) 11. Satyadharm vichar (Mela Chandapur) (1880) 12. Kashi Shastrarth (1880) 13. Arya Samaj ke Niyam aur upaniyam (30-11-1874) 14. Upadesh Manjari (Puna Pravachan) (04-07-1875) 15. Swami Dayananda dwara swakathit janm charitra (During Puna pravachana) (04-08-1875) 16. Swami Dayananda dwara swakatit janm charitra (for the theosophist society's monthly journal: nov & Dec 1880) 17. Swikar patra (27-02-1883) 18. Rishi Dayananda ke patra aur vigyapan, other miscellaneous shastrarth are published by Arsh Sahitya Prachar trust, Delhi as 1. Dayananda Shastrarth Sangrah & 2. Rishi Dayananda ke Shastrarth evam pravachana published by Ramlal Kapoor Trust, Sonipat (Haryana)

Sanskrit Academy, in order to propagate Dayananda's sanskrit works and their significance and relevance to the modern society, organized seminar on "Contribution of Swami Dayananda Saraswati to Sanskrit Studies". The proceedings of the seminar have now been brought out in the form of this publication.

Editor

In Public domain. Digitization Muthulakshmi Research Academy

Preface

Sanskrit Academy held a 2-day National Seminar on "Contribution of Swami Dayananda Saraswati to Sanskrit Studies" on 18th & 19th April 2011. Sanskrit scholars and research scholars participated and presented research valuable papers in the seminar. The Academy is now bringing out those proceedings of the seminar in the form of publication.

Swami Dayananda Saraswati -

Dayananda Saraswati, whose original name was Mula Sankara, was born in 1824, in Tankara, Gujarat, India and died on 30th Oct 1883, Ajmer, Rajputana. He was the founder of the Arya Samaj, a Hindu reform movement advocating a return to the temporal and spiritual authority of the Vedas, the earliest scriptures of India. He dedicated his life working towards a reinstatement of the Vedic Hinduism that had existed in pre-Buddist India.

Dayananda first attracted wide public attention for his views when he engaged in a public debate with orthodox Hindu scholars in Benaras presided over by the maharaja of Benares. The first meeting establishing Arya Samaj was held in Bombay on 10th April, 1875. He furthered many important social reforms. He opposed child marriages, advocated the remarriage of widows, opened vedic study to members of all castes, and founded many educational and charitable institutions.

Dayananda's works:

Dayananda Saraswati wrote more than 60 works in all, including a 16 volume explanation of the six vedangas, an incomplete commentary on the Ashtadhyayi, several small tracts on ethics and morality, vedic rituals and sacraments and on criticism of rival doctrines. Some of his major works are Satyartha Prakash, Sanskaravidhi, RigvedaBhashya Bhumika, Rigveda Bhashyam and Yajurved Bhashyam.

Complete list of his works:

I. 1.Sandhya (Unavailable)(1863) 2. Bhagwat Khandanam or Paakand Khandan or Vaishnavamata Khandan (1866) 3. Advaitamata Khandan (1870) 4. Panchmahayajna vidhi (1874 & 1877) 5. Satyartha Prakạsh (1875 & 1884) 6. Vedantidhwantnivaran (1875) 7. Vedviruddh mat khandan or Vallabhacharya mat Khandan (1875) 8. Shikshapatri dhwant nivaran or Swaminarayan mat khandan (1875) 9. Vedbhashyam namune ka pratham ank (1875) 10. Vedbhashyam namune ka dwitiya ank (1876) 11. Aryabivinaya (incomplete) (1876) 12. Ṣanskaravidhi (1877 & 1884) 13. Aaryoddeshya ratnamala (1877) 14. RigvedadiBhashyaBhumika (1878) 15. RigvedaBhashyam (7/61/1,2 only) (incomplete) (1877 to 1899) 16. Yajurved Bhashyam (complete) (1878 to 1889) 17. Ashtadhyayi Bhashya (2 parts) (incomplete) (1878 to 1879)

In Public domain. Digitization Muthulakshmi Research Academy

शोधलेखानुक्रमणिका

S.No.	Name of The Article	Name of the Author	Page No
1.	संस्कृतं प्रति दयानन्दस्य योगदानम् - सारस्वतभाषणम्	डा. वेदपालः, अध्यक्षः	1-8
2.	महर्षिदयानन्दस्वामिनः शैक्षिकदर्शनं, संस्कृतशिक्षणं, शास्त्रशिक्षणं प्रति योगदानम्	डा. देवदत्तसराडे	9-19
3.	महर्षिदयानन्दसरस्वतिमहोदयस्य शैक्षिकविचाराः	डा. डि. वेणुगोपालरावः	20-24
4.	स्वामिदयानन्दसरस्वतिवर्यः आर्षपाठ्यचर्यारूपरेखाश्च	डा. सोमनाथसाहू	25-30
5.	महर्षिदयानन्दस्वामिनां भारतीयं भव्यमैतिह्यम्	डा. विद्यानन्दार्यः	31-36
6.	वेदकालीनविविधशास्त्रविज्ञानम्	डा. वि. श्रीनिवासशर्मा	37-43
7.	महर्षिदयानन्दः एवं गोकरुणानिधिः	डा. मुक्तावाणी	44-46
8.	स्वामिदयानन्दस्य उणादिनिर्वचनशैली	सेपूरि गायत्री	47-51
9.	सत्यार्थप्रकाशे अध्ययनाध्यापनविधिः	दीपकः	52-57
10.	दयानन्दोक्तदिशा यजुर्वेदीयं पशुपक्षिमृगसरीसृपजलजन्तु-कृम्यादीनां विज्ञानम्	डा. सन्तोषकुमारजोषी	58-64
11.	दयानन्दकारकीयवैशिष्ट्यम्	माधवरावः टी.वि.	65-67
12.	उणादिकोशः	डा. वि. सुब्रह्मण्यम्	68-70
13.	Maharshi Dayananda – Rebirth of Bharat	Sri Mata Nirmala Yog Bharati	71-80
14.	Samskara Vidhi – personality development	Dr. K. Prabhavati	81-85
15.	Social reforms brought by Swami Dayananda Saraswati and Aryasamaj	Karuna	86-92
16.	Contribution of Swami Dayananda Saraswati in empowering women in Sanskrit Educational field	Dr. K. Varalakshmi	93-99
17.	The influence of Manusmriti on Satyartha Prakasha of Dayananda	Dr. Venkateswarlu	100-104
18.	Swami Dayananda's philosophy	Dr. P. Venkata Rao	105-111
19.	महर्षिदयानन्दकृतवेदभाष्यवैशिष्ट्य	स्वामिब्रह्मानन्दसरस्वती	112-120
20.	वेद और ऋषिदयानन्द	डा. विजयवीरविद्यालङ्कारः	121-125
21.	महर्षिदयानन्दसरस्वती के वेदभाष्य की विशेषता	एस्. कृष्णा	126-130
22.	शोधपत्रसमर्पकाणां सूची		131

In Public domain. Digitization Muthulakshmi Research Academy

महर्षिदयानन्दस्य संस्कृतं प्रति योगदानम्

(सङ्गोष्ठ्यां कीलकभाषणरूपेण समर्पितमिदं पत्रम्)

डॉ. वेदपाल

मनुना उद्घोषितम्— एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

बहुकालपर्यन्तम् एतद्देशीया वैदेशिकानां दृशा श्रद्धास्पदाः, तस्मिन् काले नरा नार्यश्च सदाचारपरायणाः कर्त्तव्यनिष्ठाश्चासन्, न कोऽपि स्वैरी न मद्यपः। अनाहिताग्निरपि नासीत्। स्तेनस्य तु का कथा? परं कालक्रमेण त आलस्ययुक्ताः कर्त्तव्यविमुखाः पारस्परिककलहप्रसक्ताश्च जाताः। ईदृशीपतनाभिमुख्यवस्थायां ख्रीष्टीय अष्टमशताब्देः प्रथमचरणे मुहम्मदबिन कासिम (७११ईस्वीये) इत्यस्य आक्रमणेन साकमेव भारतस्य भान्यग्भवितुं प्रवृत्ता।

वैदेशिकैः पादक्रान्तः समाजः प्रगाढनिद्रायां सुप्त इव सञ्जातः, प्रगाढनिद्रायां सुषुप्तेऽपि समाजे एकोनविंशत्यां शताब्दौ सामाजिकं राजनैतिकमथ च सांस्कृतिकदृशा नवचेतनायाः सञ्चारो दृश्यते ।अत एव एकोनविंशतिः शताब्दी भारतीयः पुनर्जागरणस्य कालः स्वीक्रीयते। कर्त्तव्यपराङ्मुखीभूतान् जनान् प्रतिबोधयन्तो दरीदृश्यन्तेऽनेके महापुरुषाः । प्रमुखाः सन्ति—राजाराममोहनरायः, केशवचन्द्रसेनः—न्यायमूर्तिमहादेवगोविन्द रानाडे—डॉ. आत्मारामः पाण्डुरङ्गः—महात्मा ज्योतिबाफुले—महर्षिदयानन्दः—मैडम एच. पी. ब्लैवेटस्की—कर्नल एच. एस. अल्काटः अथ च ए. ओ. ह्यूम महाभागाः। एतैर्महापुरुषैः— ब्रह्मसमाजः (१८२८ ईस्वीये) प्रार्थनासमाजः (१८६७ ईस्वीये) सत्यशोचकसमाजः, आर्यसमाजः (अप्रैल १८७५ ईस्वीये) थियोसोफिकल सोसायटी (७–९–१८७५ ईस्वीये) इन्डियन नेशनल कांग्रेस (१८८५ ईस्वीये) प्रभृतीनां स्थापना विहिता।

एकोनविंशत्यामेव शताब्द्यां लार्ड मैकाले महोदयैः प्रचारिता शिक्षापद्धतिः शिक्षाप्रसारव्याजेन भारतीयासंस्कृतेर्विनाशाय प्रवृत्ता2। तस्मिन्नेव काले फ्रेडरिकमैक्समूलरमहाभागानां प्रयत्ना अपि वैदिकसंस्कृतेर्विनाशाय किं वा वेदप्रामाण्यनिरसनाय प्रवृद्धतराः3।

बालविवाहः सतीप्रथासदृश्यः कुरीतयः पारिवारिकजीवनं विनश्यन्त्यो दृश्यन्ते स्म। सामाजिकजीवने अस्पृशतायाः प्रसारः सामाजिकजीवनं विनाशयितुं प्रसृतः। भारतियासंस्कृतेर्मूलं संस्कृतम्, परन्तस्य स्थानम् उर्दू – फारसी अथ च आंग्लभाषाया अधिगतम्। एतदासीत् परिदृश्यमेकोनविंशत्यां शताब्द्यां भारतवर्षस्य समाजिकधार्मिकपरिवर्तनाभिलाषिणां राजाराममोहनरायप्रभृतीनां महापुरुषाणां चिन्तनं तात्कालिकसुधारपर्यवसितम् इति कथने नास्ति वचनलाघवम्। महर्षिदयानन्दस्य चिन्तनक्षेत्रं बहुव्यापकम्। सामाजिक – राजनैतिक – आर्थिक – धार्मिक – सांस्कृतिकश्चेत्यादीनि महर्षेः चिन्तनक्षेत्राणि । महर्षिदयानन्ददृशा भारतवर्षस्य सांस्कृतिकसमृद्धेर्मूलं संस्कृतम्। संस्कृतमपहाय भारतस्य सांस्कृतिकोऽभ्युदयोऽसुकरः। यतोहि ऋग्वेदतो दर्शनवाङ्मयपर्यन्तं सांस्कृतिकं दार्शनिकञ्च चिन्तनं संस्कृतभाषयामेव निबद्धम्। अतो महर्षिदयानन्दः संस्कृताऽध्ययनं प्रतिपादयति ।

In Public domain. Digitization Muthulakshmi Research Academy

सतीप्रथासमाप्त्यर्थं कृतभूरिश्रमा एकेश्वरवादस्य सम्पोषका उपनिषद्वाङ्मयस्य अध्येतारो राजा राममोहनरायमहोदया कलिकातानगर्यां सर्वकारेण स्थाप्यमानस्य संस्कृतकालेजस्य विरोधे गवर्नरजनरल एमहर्स्टमहोदयं पत्रं विलिख्य असहमतिं प्रकटयन्ति। तद्यथा–
The sanskrit system of education would be the best caleuted to keep this country in darkness, if such had been the policy of the British legislator" 4 .

संस्कृताध्ययनेन भारतम् अन्धकारावृतं भविष्यतीति रायमहाभागानामभिमतम्। परं महर्षेः प्रेरणास्रोतः संस्कृतवाङ्मयम्। अतो महर्षिः आर्यसमाजस्य उपनियमेषु विधत्ते– समाज के प्रत्येक सभासद के लिए संस्कृत और आर्यभाषा (हिन्दी) का ज्ञान वाञ्छनीय है ।5

महर्षिदयानन्देन अध्ययनानन्तरं प्रचारयात्रायां विज्ञापनानि संस्कृतभाषायां प्रकाशितानि।आदौ शास्त्रार्था अपि संस्कृतभाषायां भवन्ति स्म। यथा – काशीशास्त्रार्थः, सत्यव्रतसामक्षमिणा तस्य विवरणं संग्रथितं प्रकाशितञ्च – प्रत्नकम्रनन्दिनीपत्रिकायाम्। महर्षिणा नैके ग्रन्थाः संस्कृतभाषायां विरचिताः। सर्वप्रथमं वेदभाष्यं विविच्यते–

<u>यजुर्वेदभाष्यम्</u> – वाजसनेयिमाध्यन्दिनसंहितायाः संस्कृतभाष्यं विरचितं महर्षिणा। भाष्यं प्रसादगुणयुक्तं। तद्यथा– ईश्वरेण सर्वमनुष्यैरनुष्ठेयोऽयं धर्म उपदिश्यते। यो न्यायपक्षपातरहितः सुपरीक्षितः सत्यलक्षणान्वितः सर्वहिताय वर्तमान ऐहिकपारमार्थिकसुखहेतुरस्ति स एव सर्वमनुष्यैः सदाचरणीयः6 ।

महर्षेर्भाष्यस्य अपरा विशेषता विद्यते– राजप्रजयोर्गुरुशिष्ययोः पारस्परिको व्यवहारः कीदृशो भवेत्। कृषिः कथं करणीया कथञ्च पर्यावरणसंरक्षणं करणीयम् ? कीदृशा नरा अध्यापयितुं शक्नुवन्ति? पुरुषस्य किं स्वरूपम् ? कः स्मरणीय इत्यादयो वेदविहिता विषया अपि तत्रोपलभ्यन्ते ।
महीधर–उवटयोर्भाष्यं यजुर्वेदं क्रियापरत्वमधिगम्य विहितम्' पूर्वतनैर्भाष्यकारैर्भाष्यं कुर्वद्भिर्मन्त्राणां देवताविषये प्रायशः सम्यग् विचारो न कृतः7। परं महर्षिः देवतापदम् अपि मन्त्रप्रतिपाद्यत्वेन स्वीकृत्य भाष्यं कृतवान्। यद्यपि तेषां मते प्रायशो देवतापदमुपास्यत्वेन न स्वीक्रियते।

<u>ऋग्वेदभाष्यम्</u> – महर्षिणा सर्वप्रथमं प्रथमसूक्तस्य (संस्कृत हिन्दीभाषायुतम्) भाष्यं विदुषां सम्मत्यर्थं प्रेषितम्। आर्. ग्रिफिथः (प्राचार्यः, राजकीयसंस्कृतमहाविद्यालयः, – वाराणसी), सी. एच. टानी (प्राचार्यः प्रेसीडेन्सी कालेज, कलिकत्ता), ओरियन्टल कालेज लाहौरस्य मुख्यः पण्डितो गुरुप्रसादशास्त्री, तत्रस्थैव द्वितीयः पण्डितो हृषीकेशभट्टाचार्यः, पण्डितो भगवान् दासः प्रभृतिविदुषां प्रतिकूलाः सम्मतयः समधिगताः। महर्षिणा सर्वासां समाधानं विहितम्। पण्डित महेशचन्द्रन्यायरत्नमहोदयस्य आक्षेपाणां समाधानं पृथक्शो भ्रान्तिनिवारणं नाम्नि ग्रन्थे कृतम् ।

वेदभाष्यग्राहकेषु प्रमुखा वैदेशिकाः– प्रो. एफ. मैक्समूलरः , प्रो. मोनियरविलियम्सः ।भारतीयेषु न्यायमूर्तिमहादेवगोविन्दरानाडे, रायबहादुरगोपालरावहरिदेशमुखः, सर टी . माधवरावः, महाराज २होल्करः, केशवचन्द्रसेनः, महेन्द्रलालसरकारः, राजा जयकृष्णदासप्रभृतयः ।7.62.2 पर्यन्तमेव

In Public domain. Digitization Muthulakshmi Research Academy

5649 मन्त्राणां भाष्यमकारि महर्षिः ।

आदावृषि – देवता– छन्दः स्वरमुल्लिख्य मन्त्रस्य प्रतिपाद्यविषयः संक्षेपेण प्रकाश्यते । महर्षेः प्राक् केनापि भाष्यकारेण स्वराणामुल्लेखो न कृतः। वैदिकशब्दा यौगिकाः सन्तीति महर्षेर्विशिष्टो मन्तव्यः। 'अग्निमीडे' ॰1. 1. 1 इति मन्त्रभाष्ये 'अग्निः' शब्दस्यार्थः परमेश्वरः। पण्डितमहेशचन्द्रन्यायरत्नप्रभृतीनां मतं यत् 'अग्निः' पदन्तु भौतिकस्य अग्नेरेव वाचकः। महर्षिणा यास्कमुद्धृत्य स्वमन्तव्याः स्थापिताः। ब्राह्मणग्रन्थानामपि प्रचुरः प्रयोगस्तत्रोपलभ्यते ।

ऋग्वेदादिभाष्यभूमिका – महर्षिणा वेदविषये स्वमन्तव्या भाष्यदिशया च द्योतनाय "ऋग्वेदादिभाष्यभूमिका" नामको ग्रन्थोविरचितः।

तत्र वेदोत्पत्तिः– वेदानां नित्यत्वं –वेदसंज्ञाविचारः – सृष्टिविद्याविषयः पृथिव्यादिलोकभ्रमणम् – आकर्षणानुकर्षणं –गणितविद्या– उपासना –मुक्तिः नौविमानादि– तारविद्या –राजप्रजाधर्म – ग्रन्थप्रामाण्याप्रामाण्यभाष्यकरणशङ्कासमाधानप्रभृतयः त्रिंशदधिका विषया विवेचिताः ।अत्रोऽभयपक्ष (पूर्वपक्ष–सिद्धान्तपक्ष इति पक्षद्वयम्) स्थापनपुरस्सरं विषयः प्रतिपादितः । तद्यथा– अथ कोऽयं वेदो नाम। मन्त्रभागसंहितेत्याह। किञ्च 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति कात्यायनोक्तेर्ब्राह्मणभागस्यापि वेदसंज्ञा कुतो न स्वीक्रियत इति ?

मैवं वाच्यम्। न ब्राह्मणानां वेदसंज्ञा भवितुमर्हति। कुतः? पुराणेतिहास संज्ञकत्वाद्वेदव्याख्यानादृषिभिरुक्तत्वादनीश्वरोक्तत्वात्कात्यायनभिन्नैर्ऋषिभिर्वेदसंज्ञायामस्वीकृतत्वान्मनुष्यबुद्धिरचितत्वाच्चेति' 8।

प्रो. मैक्समूलरमहोदयः 'संस्कृतसाहित्यस्य मानवपक्षः' इति विषयमवलब्य कथयति9-

"ऋग्वेदकाल से प्रारम्भ करके दयानन्द द्वारा स्वसम्पादित ऋग्वेद की भूमिका लिखे जाने के समय तक के साहित्य को हम दो भागों में बाँट सकते हैं। यहाँ यह बात भी बता देना समुचित ही होगा कि– दयानन्द द्वारा लिखी गयी ऋग्वेद की भूमिका भी कम रुचि पूर्ण नहीं है"।

खण्डनग्रन्थाः – महर्षिणा दयानन्देन वेदविरुद्धसाम्प्रदायिकमतानां निरसनाय बहवः खण्डनग्रन्था विरचिताः। वल्लभाचार्यमतखण्डनाय "वेदविरुद्धमतखण्डनम्" इत्याख्यग्रन्थः संस्कृतभाषायां विरचितः। महर्षिणा पुष्टिसम्प्रदायस्य "सिद्धान्तरहस्य शुद्धाद्वैतमार्तण्ड–सत्सिद्धान्तमार्तण्ड – विद्वन्मण्डन– अणुभाष्यम् आदिग्रन्थेषु–प्रतिपादितमन्तव्यानां खण्डनं विहितम्। ग्रन्थस्य तर्कप्रधाना व्यङ्ग्यपूर्णा चेति। तद्यथा–

तर्हि भावना का नाम? भावना तु पाषाणे पाषाणभावना रोटिकायां रोटिकाभावनेति यथार्थं ज्ञानमिति ब्रूमस्तस्मिंस्तद् बुद्धिरिति। तथा रोटिकायां पाषाणभावना पाषाणे रोटिकाभावनाऽयथार्थज्ञानमतस्मिंस्तद् बुद्धिभ्रमो ह्यभावना चेति' 10।

शिक्षापत्रीध्वान्तनिवारणम् – स्वामिनारायणमतदोषदर्शनात्मकः संस्कृतभाषायां विरचितो लघुग्रन्थः। अस्य शैली व्यङ्ग्यपूर्णा। तद्यथा–

"यो दैव्या सम्पदा युक्तो जनस्स त्विमां शिक्षापत्रीं कदाचिन्नैव ग्रहीष्यति, तस्मिन् विद्याप्रकाशस्य

In Public domain. Digitization Muthulakshmi Research Academy

विद्यमानत्वात्। यस्त्वविद्यासुरसम्पद्युक्तः स एतां स्वीकरोति। तस्मिन् सम्प्रदाहशब्दवाच्यस्य सम्प्रदायाग्रहान्धकारस्य विद्यमानत्वात्। सम्यक् प्रकृष्टतया दग्धज्ञाना भवन्ति यस्मिन् सोऽयं सम्प्रदाहः"। अत्र सम्प्रदायः स्थाने सम्प्रदाहः शब्दप्रयोगो व्यंग्यपूर्णः।

काशीशास्त्रार्थः – परमेश्वरस्य सर्वव्यापकत्वात् प्रतिमा नास्ति इति महर्षेर्धारणा– 'न तस्य प्रतिमाऽस्ति' 12 इति मन्त्रावलम्बिनी। परं परस्सहस्रवर्षेभ्यः परमेश्वरस्य प्रतिमा अपि भवति, निराकारः सन्नपि स साकारोऽपि भवतीति अवैदिकप्रथा विदुषां मनस्यपि बद्धमूला। साधारणजनानां तु कैव कथा?

महर्षिणा ईश्वरस्य प्रतिमापूजननिरसनाय काश्यां विंशत्यधिकपण्डितैः सह शास्त्रार्थः कृतः।विपक्षे प्रमुखा विद्वांस आसन् – स्वामिविशुद्धानन्दः, पण्डितो बालशास्त्री, महामहोपाध्यायः शिवकुमारशास्त्रिप्रभृतयः। सत्यव्रतसामश्रमिणः शास्त्रार्थविषये वक्तव्यमस्ति– परमहो! काश्यामानन्दोद्यानविचारे यत्र वयमास्म मध्यस्थाः, विशेषतो वादिप्रतिवादिवचसामनुलेखनेऽहमेक एवोभयपक्षतो नियुक्तः13।

ग्रन्थारम्भे विवरणात्मिकाः पंक्तयः_

"धर्माधर्मयोर्मध्ये शास्त्रार्थविचारो विदितो भवतु। एको दिगम्बरः सत्यशास्त्रार्थविद् दयानन्दसरस्वती स्वामी गङ्गातटे विहरति। स ऋग्वेदादिसत्यशास्त्रेभ्यो निश्चयं कृत्वैवं वदति वेदेषु पाषाणादिमूर्तिपूजनविधानं शैवशाक्तगाणपत्यवैष्णवादिसम्प्रदाया रुद्राक्षत्रिपुण्ड्रादिधारणं च नास्त्येव, तस्मादेतत्सर्वं मिथ्यैवास्ति नाचरणीयं कदाचित्' 14।

शिक्षणग्रन्थाः महर्षिदयानन्देन संस्कृतशिक्षणार्थं नैके ग्रन्थाः प्रणीताः। तद्यथा_

संस्कृतवाक्यप्रबोधः – अस्मिन् लघुग्रन्थे संलापशैल्यां लिखिता द्विपञ्चाशत् प्रकरणाः सन्ति। भाषा व्यावहारिकी सरला चेति। तद्यथा_

भोः शिष्य! उत्तिष्ठ प्रातः कालो जातः।

उत्तिष्ठामि।

अन्ये सर्वे विद्यार्थिन उत्थिता न वा?

अधुना तु नोत्थिता खलु।

तानपि सर्वानुत्त्थापय।

सर्व उत्थापिताः।

सम्प्रत्यस्माभिः किं कर्त्तव्यम्?

आवश्यकं शौचाविकं कृत्वा संध्यावन्दनम् 15।

वेदाङ्गप्रकाशः –वेदाङ्गेषु व्याकरणस्य स्थानमतीवमहत्त्वपूर्णम्। कथितं हि– 'मुखं व्याकरणं स्मृतम्' व्याकरणं वेदपुरुषस्य मुखतुल्यत्वात् महत्त्वपूर्णम्। व्याकरणाध्ययनार्थं – सन्धिविषयः नामिकः –कारकीयेत्यादिषु चतुर्दशभागेषु वेदांगप्रकाशः विरचितः। उणादिकोषस्य संस्कृतव्याख्याऽपि महर्षिणा कृता। एतदतिरिक्तम् अष्टाध्यायी भाष्यम् अपि विरचितम्। तृतीयाध्यायपर्यन्तस्य प्रकाशनं परोपकारिणीसभया कृतम्।

संस्कृतभाषायाः कविर्दयानन्दः – महर्षिदयानन्दप्रणीतेषु ग्रन्थेषु आदावन्ते च स्वरचितश्लोका

In Public domain. Digitization Muthulakshmi Research Academy

उपलभ्यन्ते।आदावीशस्तुतिर्विषयप्रतिपादनञ्च, प्रायशोऽन्ते ग्रन्थरचनाकालः कूटशैल्यां वर्ण्यते। अत्र दिङ्मात्रं प्रस्तूयते –

ऋग्वेदादिभाष्यभूमिकाया उपक्रमणिकायाम् अष्टौ श्लोका उपलभ्यन्ते। तत्र प्रथमः श्लोकः स्तुत्यात्मकः छन्दस्तत्र शार्दूलविक्रीडितम् –

ब्रह्मानन्तमनादि विश्वकृदजं सत्यं परं शाश्वतं,
विद्या यस्य सनातनी निगमभृद् वैधर्म्यविध्वंसिनी।
वेदाख्या विमला हिता हि जगते नृभ्यः सुभाग्यप्रदा
तन्नत्वा निगमार्थभाष्यमतिना भाष्यं तु तन्तन्यते।।

द्वितीयः श्लोकः कूटशैल्यां ग्रन्थरचनाकालविधायकः–

कालरामाङ्कचन्द्रेऽब्दे भाद्रमासे सिते दले।
प्रतिपद्यादित्यवारे भाष्यारम्भः कृतो मया।।

तृतीयः श्लोको ग्रन्थकर्तुर्नामद्योतकः छन्दश्च शिखरिणी–

दयाया आनन्दो विलसति परः स्वात्मविदितः,
सरस्वत्यस्याग्रे निवसति हिता हीश शरणा।
इयं ख्यातिर्यस्य प्रततसुगुणा वेदमननाऽ–
स्त्यनेनेदं भाष्यं रचितमिति बोद्धव्यमनघाः।।

ग्रन्थान्ते पद्यद्वयमुपलभ्येते। प्रथमपद्ये ग्रन्थप्रयोजनं छन्दश्च स्रग्धरा–

वेदार्थाभिप्रकाशप्रणयसुगमिका कामदा मान्यहेतुः
संक्षेपाद्भूमिकेयं विमलविधिनिधिः सत्यशास्त्रार्थयुक्ता।
सम्पूर्णाकार्य्यथेदं भवति सुरुचि यन्मन्त्रभाष्यं मयातः
पश्चादीशानभक्त्या सुमतिसहितया तन्यते सुप्रमाणम्।।

द्वितीये पद्ये वेदभाष्यक्रमो निर्दिष्टः –

मन्त्रार्थभूमिका ह्यत्र मन्त्रस्तस्य पदानि च।
पदार्थान्वयभावार्थाः क्रमाद् बोध्या विचक्षणैः।।

ऋग्वेदभाष्यारम्भ ईशस्तवनपुरस्सरो लेखनतिथिपूर्वको मन्दाक्रान्ताछन्दसि सूचितः–

विद्यानन्दं समवति चतुर्वेदसंस्तावना या
सम्पूर्येशं निगमनिलयं सम्प्रणम्याथ कुर्वे।
वेदस्त्र्यङ्के विधुयुतसरे मार्गशुक्लेऽङ्गभौमे
ऋग्वेदस्याखिलगुणगुणिज्ञानदातुर्हि भाष्यम्।।

यजुर्भाष्यारम्भे द्वौ श्लोकौ स्तः। तत्र प्रथमे प्रार्थनापूर्विका भाष्यकरणसूचना। द्वितीये रचनाकाल निर्देशः। गोकरुणानिधिः नाम्नि लघुग्रन्थेऽप्यादौ पद्यद्वयम्। तत्र प्रथमः ग्रन्थप्रतिपाद्यसूचकः, छन्दश्च वंशस्थः –

In Public domain. Digitization Muthulakshmi Research Academy

तनोतु सर्वेश्वर उत्तमं बलं गवादिरक्षं विविधं दयेरितः।
अशेषविघ्नानि निहत्य नः प्रभुः सहायकारी विदधातु गोहितम्।।

ग्रन्थान्तेऽपि पद्यद्वयम्। प्रथमः श्लेषालङ्कारयुतः चित्रकाव्यात्मकः –

धेनुः परा दयापूर्वा यस्यानन्दाद्विराजते ।
आख्यायां निर्मितस्तेन ग्रन्थो गोकरुणानिधिः ||

अपरस्मिन् पद्ये कूटशैल्यां ग्रन्थरचनाकालो निर्दिष्टः –

मुनिराममङ्कचन्द्रेऽब्दे तपस्यासिते दले।
दशम्यां गुरुवारेऽलङ्कृतोऽयं कामधेनुपः।।

आर्याभिविनय इत्याख्यस्य प्रार्थनात्मकस्य वेदमन्त्रव्याख्याग्रन्थस्य आदावष्टौ श्लोकाः। प्रथमो मंगलाचरणात्मकः। द्वितीये रचनाकालः। तृतीयश्लोकस्य छन्दः शिखरिणी। तत्र ग्रन्थकर्तृर्नामोल्लेखः।अग्रिमेषु 4-6 पद्यत्रयेषु ग्रन्थप्रयोजनम्।

सप्तमश्लोकस्य छन्दः तोटकं, तच्च दर्शनीयम् –

विमलं सुखदं सततं सुहितं, जगति प्रततं तदु वेदगतम्।
मनसि प्रकटं यदि यस्य सुखी , स नरोऽस्ति सदेश्वरभागधिकः।।

अष्टमश्लोकस्य छन्दः वंशस्थः –

विशेष भागीह वृणोति यो हितं, नरः परात्मानमतीवमानतः।
अशेषदुःखात् तु विमुच्य विद्यया, स मोक्षमाप्नोति न कामकामुकः।।

चतुर्थपादस्य तुलना श्रीमद्भगवद्गीतायाः– स शान्तिमाप्नोति न कामकामी' 2.70 श्लोकेन सह करणीया। संस्कारविधौ नव श्लोकाः। अष्टश्लोका अनुष्टुप् छन्दसि। नवमस्य छन्दः शिखरिणी। अयं श्लोको ग्रन्थकर्तुः परिचयात्मकः। स्वल्पपाठभेदपूर्वकोऽयं श्लोकः ऋग्वेदादिभाष्यभूमिका – आर्याभिविनयः उभयत्र उपलभ्यते |

महर्षिणा अन्येऽपि श्लोका विरचिताः। यथा – सत्यार्थप्रकाशस्य तृतीये समुल्लास उपलभ्यत एकः श्लोकः _

विद्याविलासमनसो धृतिशीलशिक्षाः ,
सत्यव्रता रहितमानमलापहाराः ।
संसारदुःखदलेनन सुभूषिता ये
धन्या नरा विहितकर्मपरोपकाराः।।

अत्र वसन्ततिलका छन्दः। परोपकारिणां प्रशंसा उत्साहः स्थायीभावः, वीरो रसः। संक्षेपेण प्रस्तुताः श्लोकाः प्रमणियन्ति यत् काव्यशास्त्रकारैर्हेतुत्वेन उपन्यस्तः शक्तिर्नामकः तत्त्वो नैपुण्यपूर्वको महर्षौ प्राचुर्येण

In Public domain. Digitization Muthulakshmi Research Academy

आसीत्।

महर्षिस्थापिताः संस्कृतपाठशालाः– वैदिकसंस्कृतेः संरक्षणं संस्कृतभाषासंरक्षणेनैव भवितुं शक्नोतीति महर्षेर्दृढो विश्वासः। एतदर्थं महर्षिणा संस्कृतपाठशालाः स्थापिताः। प्रथमा पाठशाला १९२५ वैक्रमाब्दे तदानीन्तनीयस्य संयुक्तप्रान्तस्य (साम्प्रतिक–उत्तरप्रदेशस्य) कासगंजनगरे स्थापिता। तत्र अष्टाध्यायी – महाभाष्यं–मनुस्मृत्यादयो ग्रन्थाः पाठ्यक्रमे निर्धारिताः। छात्रा गुरुकुलप्रणालीम् अनुपालयन्तोऽहर्निशं विद्यालये निवसन्ति स्म। छात्राणां नगरगमनं पूर्णतः प्रतिषिद्धम् आसीत्। छात्राणां कृते अग्निहोत्रम् अनिवार्यम्। अपरा पाठशाला फर्रूखाबादनगरे श्रेष्ठिवंशीलाल महोदयानामार्थिकसाहाय्येन तस्मिन्नेव वर्षे संस्थापिता। अत्र आदावेव पञ्चाशत् छात्राः प्रविष्टाः।अध्यापकत्वेन पण्डितो ब्रजकिशोरः नियोजितः। वेतनरूपेण त्रिंशत् रूप्यकाणि प्रतिमासं निर्धारितानि।

मिर्जापुरनगरे तथा च अलीगढजनपदस्य छलेसरनगरे अन्ये द्वे पाठशाले स्थापिते। काश्यामपि महर्षिभक्तेन महात्मना जवाहरदासेन संस्कृतपाठशाला प्रारब्धा। अत्र शिवकुमारशास्त्री (महामहोपाध्यायः) अध्यापकत्वेन नियुक्तः।

महर्षेरभिलषितम् अष्टाध्यायीमाध्यमेन संस्कृतशिक्षणम्। परं ये अध्यापका नियुक्तास्तेषां महर्षिणा सार्द्धं वैचारिका मतभेदा अथ च अष्टाध्यायीपाठेन काठिन्यम्। तेनायमुपक्रमः साफल्यं न प्राप्तवान्। परं साम्प्रतिकी गुरुकुलपरम्पराया उत्सः तस्मिन्नेवोपक्रमेऽन्तर्निहित इति कथने नास्ति अतिशयोक्तिः।

महर्षेः प्रागपि संस्कृतपाठशाला आसन्। परं तत्राध्ययने वर्गविशेषीयछात्राणामेवाधिकारः। अध्यापका अपि वर्गविशेषीया एव। दयानन्दस्थापितपाठशालासु समेषामध्ययनाधिकारः। नासीत् तत्र कोऽपि जन्माधारितो भेदभावः।

दयानन्द एंग्लोवैदिकसंस्था– महर्षेरनुयायिभिर्दयानन्द एंग्लो वैदिकनाम्नि संस्था स्थापिता। तत्र संस्कृतभाषाया वैदिकवाङ्मयस्य च अध्ययनम् आंग्लभाषया सहैव प्रारब्धम्।

गुरुकुलप्रणाली– संस्कृतप्रसाराय विंशत्यां शताब्द्यां सर्वत्र देशे बहवः संस्कृतविद्यालयाः गुरुकुल नाम्ना प्रारब्धाः। तत्र प्रमुखाः सन्ति – गरुकुलविश्वविद्यालयः काङ्गडी, हरिद्वारम् गरुकुलमहाविद्यालयः ज्वालापुरम् गुरुकुलसिकन्दराबादः गरुकुलमहाविद्यालयः, झर्झरं गुरुकुल अयोध्या, गुरुकुलमहाविद्यालयः ततारपुरम् कन्यानां कृते नरेला गुरुकुलं गरुकुलशिखापुरम् (चोटीपुरा), गुरुकुल नजीबाबादः, पाणिनिमहाविद्यालयः वाराणसी प्रभृतयः शताधिकाः विद्यालया दयानन्दविहितपाठविधिमनुसृत्य अद्यापि संस्कृतप्रसारे संलग्नाः। अत्र कस्यापि वर्गस्य कुलस्य वा कस्यापि प्रान्तस्य छात्रः छात्रा वा भेदभावं विना अध्येतुं शक्नोति। सामाजिकसौमनस्यक्षेत्रे गरुकुलानां योगदानम् अतीवमहत्त्वपूर्णम्।

गरुकुलेषु अधीतविद्यैर्विद्वद्भिर्या संस्कृतसेवा कृता तस्या वर्णनं संक्षिप्तपत्रे कर्तुमशक्यम्। पुनरपि दिङ्मात्रमुदाह्रियते महाकविना मेधाव्रताचार्येण दयानन्ददिग्विजयम् ' महाकाव्यं प्रकृतिसौन्दर्यम् – कुमुदिनीचन्द्रः ब्रह्मचर्यशतकम् गुरुकुलशतकम् – ब्रह्मर्षिविरजानन्दचरितम् प्रभृतयो मौलिकग्रन्था विरचिताः। पण्डितदिलीपदत्तशर्मणा मुनिचरितामृतं महाकाव्यम्– प्रतापचम्पूः संस्कृतालोकः प्रभृतयः द्विजेन्द्रनाथशास्त्रिणा दयानन्दोदयः, स्वराज्यविजयम् महाकाव्ये, रमाकान्तशास्त्रिणा दयानन्दचरितं महाकाव्यम् धर्मदेवविद्यामार्तण्डेन

In Public domain. Digitization Muthulakshmi Research Academy

महापुरुषकीर्तनं– महिलामणिकीर्तनं द्वे काव्ये विरचिते।

अन्यैरपि विद्वद्भिः महाकाव्यानि– काव्यानि– चरितग्रन्था आदयो नैके ग्रन्थाः प्रणीताः।

दयानन्दसमकालिकैर्महापुरुषैः पृथक् – पृथक् क्षेत्रेषु प्रयत्ना विहितास्तेषां प्रेरणास्रोतांसि भिन्नानि। परं दयानन्दस्य प्रेरणास्रोतो वैदिकवाङ्मयं संस्कृतञ्चेति। अतो दयानन्देन संस्कृतिः संस्कृतोद्धाराय बहुविधाः प्रयत्नाः कृताः। परिणामतः संस्कृताध्ययनं प्रति जनानाम् अभिरूचिः प्रवृद्धा। सङ्क्षेपेण कथयितुं शक्यते यत् – दयानन्दर्षेराविर्भावः प्रयत्नाश्च संस्कृतोद्धाराय जाताः ।

****

1. मनु० 2.20

2. our English schools are flourishing wonderfully . The effect of this education on the Hindus is Prodigious. No Hindu, who has received English education ever remains sincerely attached to his religion . ...लार्ड टी. बी.
मैकाले द्वारा अपने पिता को कलकत्ता से 12 october 1836 को लिखा गया पत्र 329.330

3. Life and letters of Maxmuller.

4. Raja ram mohan roy; His life, writings and speeches . G . A . Nateson & eq; madras- p. 89

5. उपनियम–36

6. यजु. 1. 5– अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि – मन्त्रभाष्ये

7. यथा– यजु. 6.14 मन्त्रव्याख्याने

8. वेदसंज्ञाविचारः– ऋग्वेदादिभाष्यभूमिका, पृ. 80

9. 'हम भारत से क्या सीखें' – शीर्षक भाषण माला के अन्तर्गत तृतीयव्याख्यान, पृ. 102

10. दयानन्दलघुग्रन्थसंग्रहः– आर्षसाहित्यप्रचारट्रस्ट, दिल्ली. पृ. 19

11. वही, पृ, 121

12. यजु. 32. 3

13. ऐतरेयालोचनम् – पृ–127

14. काशीशास्त्रार्थः– पृ– 3

15. संस्कृतवाक्यप्रबोधः – पृ– 1

16. सत्यार्थप्रकाशः तृतीयः समुल्लासः

In Public domain. Digitization Muthulakshmi Research Academy

महर्षिदयानन्दस्वामिनः शैक्षिककदर्शनं संस्कृतशिक्षणं शास्त्रशिक्षणं प्रति योगदानञ्च

डा. देवदत्तः सरोडे

प्रास्ताविकम् –

भारतस्यैतिह्ये एकोनविंशतितमाशताब्दी नवजागरणशताब्दी इति कथने नास्ति अतिशयोक्तिः। आभारतं परस्परं द्विषत्सु भारतीयनृपेषु, अविद्यायां रतेषु जनसामान्येषु, आङ्ग्लान् सेवमानेषु मैकालेमानसपुत्रेषु, पाखण्डेषु, अधर्मेषु, सम्पृक्तेषु धर्ममार्तण्डेषु, आङ्ग्लदास्यशृङ्खलया परिपीड्यमानेषु भारतीयजनेषु, सर्वत्र अराजकत्वमुपप्लवः, अन्यायः, कदाचारः शोषणं, वचनम् इत्येतस्यैव प्राबल्यम् आसीत्। नानाजातिषु विभक्तो भारतीयसमाजः अवर्तत, एता जातय परस्परं कलहायन्ते स्म । धर्मगुरवः अन्योऽन्यं असहमाना द्विषन्ति स्म । धर्ममूढाः दिङ्मुग्धाः भारतीयाः कामकारतः प्रवर्तन्ते स्म। नाना मिथ्या सम्प्रदायाः मतानि गुरवः भगवन्तः पाखण्डिनः जनान् प्रलोभ्य वञ्चयन्ति स्म। देशे यवनानां शासनम्, आर्याणां धर्मपरिवर्तनं विधाय यवनक्रिस्तइस्लाममतेषु दीक्षितान् कृत्वा यावनमतं प्रतिष्ठापयामासुः यावनाः। जनेषु दारिद्र्यम्, यावनदास्यं वैदेशिकशासकानां सर्वत्र गुणगौरवं, सामन्ताधिपानां प्रजापीडनमेव परमधर्मः आसीत् । यत्र धर्मनिष्ठा राष्ट्रनिष्ठा निजजातिधर्मभाषासंस्कृतिसभ्यतैतिह्यमहापुरुषाणां गौरवम् अनुदिवसं क्षीयमाणम् आसीत् एतादृशीषु विषादस्थितिषु स्वामिदयानन्दो जनिं लेभे।

स्वामिदयानन्दस्य संक्षिप्तजीवनपरिचयः -

स्वामिदयानन्दस्य जन्म गुर्जरराज्ये मौरवी प्रान्ते टंकारा ग्रामे औदिच्यब्राह्मणकुले १८२४ ईस्वीयाब्दे अभूत्। अस्य पितुः नाम कर्षनजी तिवारी मातुः नाम रूक्मिणी आसीत्। पिता कर्षन जी परमशिवभक्तः अवर्तत। बाल्यकाले कुलपरम्परामनुसृत्य गृहे एव अक्षराभ्यासः यजुर्वेदस्य कण्ठस्थीकरणं मूलशङ्करेण व्यधायि। १८३७ ईस्वीयाब्दे मूलशङ्करः शिवरात्रौ पितुराज्ञया शिवरात्रिव्रतमाचचार। ग्रामशिवमन्दिरे रात्रीजागरणकाले सुप्तेषु सर्वभक्तजनेषु एकाकिनि जागरिते दयानन्दे शिवलिङ्गस्योपरि कश्चन मूषकः नैवेद्यादिपदार्थान् सेवितुं समारूढः। एतद्वीक्ष्य मूलशङ्करेण चिन्तितं यत् "देवाधिदेवमहादेव" आत्मनि आरूढं क्षुद्रं जन्तुमपि दूरीकर्तुं न प्रभुः तर्हि दैत्यादीन् हन्तुं कथं प्रभवेत् ? कैलासवासी शङ्करः अयमेव भवितुनार्हीति वस्तुतः शिवः अन्यः भवेद् इति विषण्णमना गृहमुपगम्य मातरमेतद् विनिवेद्य सुष्वाप, ततः परं समतिक्रामत्सु केषुचिद् दिवसेषु तस्य भगिनी मृता पश्चात् वत्सलपितृव्यः दिवंगतः। एतन्मरणं विलोक्य नानाविचारवितर्कविमनायितं मूलशङ्करस्य चित्तं सत्यान्वेषणे संलग्नम् । १८४६ ईस्वीयाब्दे गृहं परित्यज्य सिद्धयोगिनि सविधे सत्यज्ञानप्राप्त्यर्थं प्रयत्नोऽकारि। आभारतं १४ वर्षाणियावत् सत्यान्वेषणे संचचार। एतस्मिन् अन्तरे स्वामिनः पूर्णानन्दात् सन्न्यासं जग्राह ततः स्वामिदयानन्दसरस्वती सञ्जातः । १८६० ईस्वीयाब्दे मथुरास्थदण्डिविरजानन्दस्वामिनः सविधे वर्षचतुष्टयम् आर्षग्रन्थान् अष्टाध्यायीमहाभाष्यादीन् अधीत्य १८६४ विद्यां परिसमाप्य लोककल्याणं विधातुं मथुरातः निश्चक्राम । १८६७ ईस्वीयाब्दे हरिद्वारस्थकुम्भमेलावसरे पाखण्डखण्डिनीपताकां तत्र उत्तोल्य समकालिकधर्मक्षेत्रे

In Public domain. Digitization Muthulakshmi Research Academy

सामाजिकक्षेत्रे प्रवृद्धपाखण्डानि खण्डयितुं प्रवृत्तः।

१८६९ विद्यानगर्यां काश्यां पण्डितैः सह मूर्तिपूजामभिलक्ष्य शास्त्रार्थः सम्पन्नः त्रिशते पण्डितेषु नैकोऽपि, वेदेषु , मूर्तिपूजासम्मतं प्रमाणं प्रदातुम् अलं बभूव तत्र स्वामिदयानन्दो विजयी जातः। १८७४ ईस्वीयाब्दे राजाजयकृष्णदासस्य प्रेरणया स्वामिदयानन्दः १२.६.१८७४-३०.९.१८७४ पर्यन्तं कालजयी सत्यार्थप्रकाशग्रन्थं सार्धत्रिमासेषु व्यरचयत्।

१८७५ मुम्बईनगर्यां काकडवाडी स्थाने प्रथमार्यसमाजस्य स्थापना विहिता। १८७७ कलकत्ताप्रवासे देवेन्द्रनाथमुखोपाध्यायः श्रीकेशवचन्द्रसेनः ब्रह्मसमाजिनौ मिलितौ श्रीकेशवचन्द्रसेनस्य परामर्शमङ्गीकृत्य केवलं कौपीनधारिदयानन्दः, वस्त्राणि धर्तुं हिन्दीभाषया लेखनं प्रवचनं कर्तुम् अङ्गीचकार, एतस्मिन् वर्षे एव लाहोर नगरे आर्यसमाजस्य स्थापना कृता। अयमेवार्यसमाज उत्तरभारते सामाजिकधार्मिकराष्ट्रियसांस्कृतिकनवजागरणे अग्रेसरोऽवर्तत।

स्वामिदयानन्दः १८६४ आरभ्य १८८३ पर्यन्तं सम्पूर्णे मध्योत्तरभारते वैदिकधर्मस्य प्रचारं प्रसारम् अकार्षीत् । सुप्तराष्ट्रस्य धर्मभाषासंस्कृतिस्वदेशाभिमानं प्रबोधयाञ्चकार एतन्मध्ये, नैके शास्त्रार्थाः, चर्चाः विहिताः । ग्रन्थलेखनं, विद्वन्मेलनं, समाजसंस्करणं कृतम् । गुणकर्मस्वभावानुसारं वर्णव्यवस्थां, वेदोक्तधर्मव्यवस्थां पुरस्कृत्य प्रचारं चकार । बालविवाहनिषेधः विधवाविवाहव्यवस्था, स्त्रीशिक्षा, स्त्रीवेदाधिकारः शूद्रशिक्षाधिकारः वेदाधिकारश्च एकेश्वरवादः मूर्तिपूजाखण्डनं, आदर्शवेदोक्तजीवनम् इत्यादीनि नानाकार्याणि महर्षिदयानन्देन समपादि ।

सत्यसनातनवैदिकधर्मप्रचारप्रसारकाले पाखण्डखण्डनसमये स्वामिनि दयानन्दे षोडशकृत्वः विषप्रयोगः अकारि पापिपाखण्डिधूर्तजनैः । विषप्रभावेण अन्ते १८८३ ईस्वीयाब्दे, दीपावली अमावस्यायां भुवं विरहय्य स्वामिदयानन्दः दिवं जगाम ।

शिक्षा(Education) – शिक्ष्- विद्योपादाने इत्यस्माद्धातोः गुरोश्चहलः इति अप्रत्यये कृते स्त्रियां टापि सति शिक्षा इति पदं निष्पद्यते शिक्ष्यते, बुध्यते ज्ञायते अनयेति शिक्षा, शिक्षा नाम ज्ञानप्रदानं ज्ञानार्जनं च महर्षिदयानन्दस्वामी स्वकीय सत्यार्थप्रकाश इति पुस्तके द्वितीयसमुल्लासे अथ शिक्षां प्रवक्ष्यामः इति बालशिक्षामधिकृत्य वर्णनं किञ्च तृतीयसमुल्लासे अथ अध्ययनाध्यापनविधिं व्याख्यास्यामः इति शिक्षामधिकृत्य वर्णनं चकार अपि च ऋग्वेदादिभाष्यभूमिका इति पुस्तके पठनपाठनविषयमभिलक्ष्य वर्णयामास तथा च संस्कारविधिः इति ग्रन्थेऽपि पठनपाठनविधिः इति शीर्षके अधिशिक्षं लिलेख । स्वामी "स्वमन्तव्यामन्तव्यप्रकाशे " शिक्षामेवाह .... शिक्षा- “यया विद्या, सभ्यता, धर्मात्मता, जितेन्द्रियता....... इत्यादीनां संवृद्धिः भवेत् अपि च आभिः अविद्यादयो दोषाः नष्टाः स्युः। "

किञ्च स्वामिनः साहित्ये तत्र तत्र विकीर्णेषु शिक्षावचनेषु तेषां समग्रशिक्षाविषयकाभिमतम् एवं जातीयकं भवितुमर्हति। शिक्षा नाम परमाणुतः परमेश्वरपर्यन्तं यथावत् ज्ञानप्राप्तिः अथवा पराविद्यायाः अपरा विद्यायाः च संप्राप्तिः। बौद्धिकशैक्षिकशारीरिकात्मिकसामाजिकधार्मिकानुशासनात्मकविकासयुतलोकोपकारकसच्चारित्र्य-समन्वितव्यक्तित्वस्य निर्माणम्।

श्रीमतः दयानन्दस्वामिनः साहित्यानुशीलनेन एतत् सुतरां स्फुटीभवति यत् तस्य शिक्षायाः तात्पर्यं कियत्

In Public domain. Digitization Muthulakshmi Research Academy

गभीरतरं उदात्ततरञ्च विद्यते यथा आर्यसमाजस्य दशनियमेषु अष्टमनियमः एवमस्ति।

'अविद्यायाः नाशो विद्यायाः वृद्धिः कर्त्तव्येति ।'

किञ्च षष्ठे नियमे एवमाह - लोकोपकारः अस्य समाजस्य प्रधानोद्देश्यं विद्यते अर्थात् शारीरिकात्मिकसामाजिकोन्नतिसम्पादनम् ।

सत्यार्थप्रकाशस्य तृतीयसमुल्लासस्य आरम्भे स्वामी एवमुवाच "आत्मनः अपत्यानि उत्तमविद्याशिक्षागुणकर्मशीलस्वरूपाभरणैः सुभूषितानि स्युः इत्येतद् मातृपित्राचार्यसम्बन्धिनां मुख्यं कर्त्तव्यम् विद्यते "अग्रेऽवोचत् -" यतः सुवर्णादिभूषणधारणेन केवलं देहाभिमानं विषयासक्तिः चौरादीनां भयं भवति, क्वचित् मरणमपि संभवेत् ।"

शिक्षायाः महत्त्वम् - शिक्षायाः माहात्म्यं प्रतिपादयन् महर्षिः प्राह -

"विद्याविलासमनसोधृतशीलशिक्षाः, सत्यव्रता रहितमानमलापहाराः।
संसारदुःखदलनेन सुभूषिताः ये, धन्या नरा विहितकर्मपरोपकाराः ।।"

येषां मनांसि विद्याविलासे निमग्नानि सन्ति ये च्च जनाः सुशीलस्वभावयुताः सत्याचरणे तत्परा अपि च पवित्रा मदविरहा वेदोक्तकर्मभिः लोककल्याणे संलग्ना भवबन्धदुःखभञ्जनेन लोके समादृताः तादृशाः जनाः धन्या भवन्ति इति । मनुरपि प्राह-

"विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति। "

द्वितीयसमुल्लासस्य अन्ते पाठनस्य महत्त्वं पित्रोः कर्त्तव्यं च स्मारयन् महर्षिः उवाच-

माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा।।

स्वामिदयानन्दाभिमतानि शिक्षायाः उद्देश्यानि -

1. धार्मिकतास्तिकतासमन्वितसच्चारित्र्यस्य निर्माणम्।
2. शारीरिकात्मिकसामाजिकविकाससम्पादनम्।
3. विद्यायाः वृद्धिः अविद्यायाः निर्मूलनम्।
4. ब्रह्मचर्यं सत्प्रवर्तनं धर्माचरणं तपश्चरणम् इत्यादीनां सद्गुणानामाचरणम्।
5. मानवस्य सर्वाङ्गीणविकाससम्पादनं येन अभ्युदयनिश्रेयसोरवाप्तिः स्यात्।
6. वेदानां वेदानुकूलशास्त्राणां संरक्षणं पठनं पाठनम्।
7. वैदिकसंस्कृतेः संरक्षणम्।
8. नैतिकमूल्यानां संवर्धनम्।
9. व्यष्टिहितं समष्टिहितञ्च इत्येतद् द्वयं सम्पादनीयम् ।
10. शिष्टाचारः सभानुकूलव्यवहारः।
11. विज्ञानं, शिल्पं, कलाम् अन्या उपाधिविद्याः कौशलानि सर्वमेतत् समुपार्जनीयम्।
12. सत्यासत्यनिर्णयसदसद्विवेकसम्पादनम्।
13. राष्ट्रभक्तिः दैवभक्तिः शास्त्रनिष्ठा वर्धनीया।

In Public domain. Digitization Muthulakshmi Research Academy

14. लोककल्याणभावना।
15. समेषां कृते भेदभावं वर्जीयित्वा समानशिक्षणसमानसमुदाचारसमानावकाशकल्पनम्।
16. उत्तमसन्नागरिकनिर्माणम्। **कृण्वन्तो विश्वमार्यम्।**
17. स्वदेशाभिमानजागरणम्।
18. पारतन्त्र्यविनिर्मूलनं स्वातन्त्र्यप्राप्तिः।
19. वसुधैवकुटुम्बकम् इति भावना समुत्पादनीया।
20. संस्कृतलिपिभाषाव्याकरणज्ञानार्जनम्।
21. अन्यभारतीयभाषापाश्चात्त्यभाषाधिगमः।
22. समग्रान्तरिकबाह्यव्यक्तित्त्वस्य सर्वविधविकाससम्पादनम्।
23. प्रकृतेः पर्यावरणस्य च संरक्षणं तदनुकूलाचरणम्।
24. ज्ञानार्जनम् अनुभूतिसम्पादनञ्च।

महर्षिदयानन्दाभिमता शिक्षाव्यवस्था-

शिक्षायाः उद्देश्यानि सम्प्राप्तुं शिक्षणाधिगमौ सम्यक् निर्वर्तयितुं काचित् सुनियोजिता व्यवस्था स्यात् यया शिक्षणाधिगमकार्यं निर्विघ्नं सम्पद्येत। महर्षिदयानन्दस्वामी स्वकीये प्रसिद्धे सत्यार्थप्रकाशग्रन्थे द्वितीये तृतीये च समुल्लासे शिक्षाव्यवस्था कथं स्यात् इति वर्णयति । तत्र द्वितीयसमुल्लासे बालशिक्षां वर्णयन् **"मातृमान् पितृमान् आचार्यवान् पुरुषोवेद "** इति शतपथब्राह्मणस्य वचनमुपस्थाप्य एवमाह "यस्य माता सुशीला धार्मीकी, विदुषी भवति यस्य पिता सदाचारी परोपकारी विद्वान् भवति यस्य गुरुः बहुश्रुतः छात्रवत्सलः आचारवान् भवति निश्चप्रचं स जनः अतीव भाग्यशाली भवति । तत् कुलं धन्यं भवति।" आचार्यः साङ्गोपाङ्गवेदविद्यानामध्यापकः सत्याचारस्य प्रापकः असत्याचारस्य हारकः इति स्वामिदयानन्दाभिमतम् । निरुक्तकारः **यास्कः** ब्रूते-

" आचार्यः कस्मात् आचारं ग्राहयति आचिनोति अर्थम् आचिनोति बुद्धिमिति वा।"

स्वामिनः मते शिक्षाया आरम्भः गर्भादानाद् आरभ्य भवति अतः मातापितरौ उत्तमसन्तानप्राप्त्यर्थं सदाचरणमुत्तमपदार्थानां सेवनं कुर्याताम् । स्वामिदयानन्दः मनुते यत् गर्भादानाद् आरभ्य माता सद्वर्तनेन स्वाध्यायेन गर्भस्थशिशुं परिपालयेत् संस्कुर्यात् बालजन्मनः परं पञ्चवर्षपर्यन्तं मातैव शिष्टाचारान् वर्णोच्चारणं मातृभाषां शिक्षयेत् पश्चात् बालकं पिता सप्तमवर्षं यावत् विद्यां, लौकिकव्यवहारान् बोधयेत् । ततः परम् अष्टमे वयसि१ गरुकुलं पाठशालां वा प्रेषयेत् यत्र उत्तमाचार्यस्य सविधे सदाचारान् नैतिकगुणान् नानाविद्याः शिल्पकलाः बालकः सम्पादयेत्।

१. प्राथमिकी शिक्षा गृहे भवेत् ततः परं उच्चशिक्षा गरुकुले पाठशालायां भवेत् ।
२. पितरौ आत्मनः अपत्यस्य लालनं न कुर्यातां यतः लालनाश्रयाः दोषा भवन्ति ।२
३. प्राचीनर्षिमुनीनां भारतीयशिक्षाव्यवस्था भवेत् ।
४. सहशिक्षा अर्थात् स्त्रीपुंसां सम्मिलिताशिक्षा न भवेत् इति स्वामिनः मतम् ।
५. बालकानां शिक्षणं विद्याध्ययनं वा गुरुकुले पाठशालायां कन्यानां शिक्षणं कन्यागुरुकुले कन्यापाठशालासु वा भवेत् ।

In Public domain. Digitization Muthulakshmi Research Academy

६. एतद्गुरुकुलं ग्रामाद् नगराद् वा दूरे एकान्ते अरण्ये वा भवेत्। कन्यानां गुरुकुलानि पाठशालाः बालकानां गुरुकुलेभ्यः दूरे पृथक् च स्युः।

७. गुरुकुलस्य स्थानम् अथवा पाठशालायाः स्थानं नदीनां सङ्गमे३ नदीतीरे , उपत्यकासु आरण्यकप्रान्ते रमणीयप्राकृतिकवातावरणे स्यात्।

८. बालकानां गुरुकुले पुरुषा आचार्याः शिक्षकाः स्युः बालिकानां पाठशालासु महिला आचार्या भवेयुः।

९. सर्वेभ्यः पक्षपातरहिता समानशिक्षा, तुल्यान्नपानवस्त्रसाधनसामग्रीसम्पूर्तिः समानसमुदाचारः, समानावसरो भवेत्। स्वावलम्बिनी गुरुकुलीयव्यवस्था भवेत्, समेषां जनानां कृते निः शुल्का अनिवार्या शिक्षा स्यात्। निर्धनानां कृतेऽपि शिक्षाव्यवस्था भवेत्।

१०. अष्टमे वर्षे बालकमुपनीय गायत्रीमन्त्रोपदेशं विधाय वेदारम्भम् आचार्यः कुर्यात्। प्रत्यहं सन्ध्योपासनं प्राणायामम् अग्निहोत्रं च ब्रह्मचारी कुर्यात्। ब्रह्मचारी सदाचरणे तत्परः भवेत् तथा आचार्यः ब्रह्मचारिणः दोषान् अपाकृत्य सदाचारान् ४ धर्माचरणं शिक्षयेत्।

११. शिक्षा शूद्राणां महिलानां कृतेऽपि स्यात् न केवलं शिक्षा वेदाध्ययनमपि कारयेत्।

अत्र केचन आक्षिपन्ति यत् "**स्त्रीशूद्रौ नाधीयाताम्** इति श्रुतेः" अतः स्त्रीशूद्राणां वेदाध्यापनं न कार्यम्। स्वामिदयानन्दस्तु एतन्न सहते। इदं वचनं खण्डयन् श्रुतिप्रमाणं ददौ-

"यथेमां वाचं कल्याणीमावदानि जनेभ्यः।

ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय ।।यजुर्वेदः २६-२

पाठ्यक्रमः पाठ्यग्रन्थाश्च-

आर्षम् अनार्षम्- महर्षिदयानन्दः यदा गुरुवरविरजानन्दात् व्याकरणमध्यगीष्ट तदा गुरुः तस्मै उपदिदेश यत् ऋषिप्रणीतानि आप्तोपदिष्टानि शास्त्राणि पुस्तकानि पठितव्यानि, लौकिकपुरुषैः निर्मितानि क्षुद्राशयानि अनार्षपुस्तकानि न पठितव्यानि इति। अतः स्वामिदयानन्दोऽपि स्वकीयरचनासु सर्वत्र आर्षग्रन्थानां पठनस्य माहात्म्यं वर्णयामास, तद्यथा सत्यार्थप्रकाशे तृतीये समुल्लासे "अनार्षलौकिकग्रन्थानां पठनं तावत् महता परिश्रमेण अल्पलाभप्राप्तिः यथा महतो वंशस्तम्भात् लङ्घानुकर्षणम्। परन्तु आर्षग्रन्थानां पठनं तथा वर्तते यथा- "एकदा निमज्जनं बहुमूल्यमुक्तासम्पादनम्।" अतः सत्यार्थप्रकाशे ऋग्वेदादिभाष्यभूमिकायां संस्कारविधौ च स्पष्टतया आर्षग्रन्थानामुल्लेखः तेषां पठनक्रमश्च प्रदत्तः।

आर्षग्रन्थपठनक्रमः- वर्णोच्चारणशिक्षा अष्टाध्यायी च पाणिनिना प्रणीता। अनयोः कण्ठस्थीकरणं ततः परं संस्कृतभाषाभ्यासः अष्टाध्याय्याः (प्रथमायाः) वृत्तेः अध्ययनम् अर्थात् सूत्रक्रमेण सूत्राणां व्याख्यानं पदसिद्धिश्च तद्यथा, आदौ पदच्छेदः५ विभक्तिः, पदार्थः, समासविग्रहः अन्वयः, अर्थनिष्पादनं पूर्वपक्षः (शङ्का) उत्तरपक्षः (समाधानम्) अनेन क्रमेण समेषां सूत्राणां व्याख्यानं कृत्वा शिक्षयेत्।

अष्टाध्याय्याः सूत्रार्थाध्ययनात् परं धातुपाठस्य दशलकाररूपाणां प्रक्रियासमन्वितं पाठनं कुर्यात्। एतदनन्तरम् उणादिकोशस्य गणपाठस्य च पाठने सर्वसुबन्तविषयं भृशं विशदीकुर्यात्। एतस्मात् परं अष्टाध्याय्याः द्वितीयामावृत्तिं (काशिकां) पाठयेत् यत्र शङ्कासमाधानं वार्तिकानि कारिकाः परिभाषाश्च बोधयेत्। इतः परं महाभाष्यं

In Public domain. Digitization Muthulakshmi Research Academy

पतञ्जलिमुनिविरचितम् अध्यापयेत् । यदि मतिमन्तः, पुरुषार्थिनः, ऋजवः विद्याभिलाषिणः परिश्रमेण पठेयुः पाठयेयुश्च तदानीं त्रिषु सार्धत्रिषु चतुर्षु वा वर्षेषु कृत्स्नं व्याकरणं समपद्येत ।

व्याकरणानन्तरं निघण्टुः यास्कमुनिविरचितं निरुक्तं षट्सु अष्टसु वा मासेषु अध्यापयेत् । ततश्च पिङ्गलाचार्येण प्रणीतं छन्दःशास्त्रं पाठयेत् येन लौकिकवैदिकछन्दसां परिचयो जायेत किञ्च अनेन नवीनश्लोकरचनाम् अधीयीत। यास्कमुनिरचितकाव्यालङ्कारसूत्राणि वात्स्यायनमुनिकृतं भाष्यसहितं शिक्षयेत्। एतत् चतुर्षु मासेषु पठेत् पाठयेत् । मनुस्मृतिं, वाल्मीकिरामायणं, महाभारतस्थोद्योगपर्वणि विद्यामानां विदुरनीतिम् एतेष्वपि उत्तमोत्तमानि प्रकरणानि एकस्मिन् हायने पठेत् पाठयेत् च। अपि च सूर्यसिद्धान्तादिषु ग्रन्थेषु अन्यतमसिद्धान्तग्रन्थात् गणितविद्या यत्र बीजगणितं, रेखागणितं पाटीगणितञ्च पठेत् पाठयेत्। निघन्टुमारभ्य ज्योतिषं यावत् वेदाङ्गानि चतुर्षु वर्षेषु अध्यापयेत्। एतावत् पर्यन्तं वेदाङ्गानामध्ययनक्रमः प्रदर्शितः अधुना उपाङ्गानामध्ययनक्रमः तत्प्रवक्तारः मुनयः तेषां वृत्तिभाष्यादिसाहित्यम् इत्येतत् क्रमशः प्रस्तूयते ।

जैमिनिमुनिना प्रणीतं मीमांसादर्शनं व्यासमुनिरचितं६ व्याख्यासहितं, कणादमुनिरचितं वैशेषिकदर्शनं प्रशस्तपादभाष्यसहितं गौतममुनिकृतं न्यायशास्त्रं वात्स्यायनमुनिकृतभाष्यसहितं पतञ्जलिमुनिरचितं योगदर्शनं व्यासकृतभाष्यसहितं, कपिलमुनिकृतं सांख्यशास्त्रं भागुरिमुनिविरचितं भाष्यं, वेदान्तदर्शनं जैमिनि अथवा बोधायन इत्यादिमुनिभिः रचितं संस्कृतव्याख्यासहितं पाठयेत्। वस्तुतः वेदान्तदर्शनाध्यापनात् प्राक् ईश, केन, कठ, प्रश्न, मुण्डक, माण्डुक्य, ऐतरेय, तैत्तिरीय, छान्दोग्य बृहदारण्यक इति दशोपनिषदः पाठयेत्। इमानि षड्दर्शनानि द्वयोः वर्षयोः शिक्षयेत्। ततश्च ऐतरेयब्राह्मणम् आश्वलायनकृतं श्रौतसूत्रं गृह्यसूत्रं कल्पसूत्रं (धर्मसूत्रं) ततः परं वेदाध्ययने पदपाठं छन्दः, स्वरं पदार्थम् अन्वयव्याख्यासहितं त्रिषु वर्षेषु अध्यापनं समापयेत्। तद्वद् यजुर्वेदं शतपथब्राह्मणादीनि शिक्षयेत्। सामवेदं सामब्राह्मणं वर्षद्वये अथर्ववेदं गोपथब्राह्मणं पाठयेत्। एतत् सर्वं नववर्षेषु चतुरः वेदान् पठेत् पाठयेत् च। आयुर्वेदे चरकं सुश्रुतं, निघण्टुं पाठयेत्। एतानि आयुर्वेदपुस्तकानि त्रिषु वर्षेषु बोधयेत्। ततश्च धनुर्वेदं शास्त्रास्त्रविद्यां राजानं शिक्षयेत् एतद् अङ्गिरामुनिकृतं विद्यते एतदपि त्रिषु वर्षेषु पठेत् पाठयेत् च। गान्धर्ववेदं यत्र नारदसंहितादिग्रन्थान् स्वर, राग, रागिणी, ग्रामताल मूर्च्छना इत्यादीनाम् अध्यापनं यथावत् त्रिषु वर्षेषु सफलीकुर्यात्। ततश्च अर्थवेदं अथवा शिल्पशास्त्रं त्वष्टुः विश्वकर्मणः मयकृतसंहिताग्रन्थं षट्सु वर्षेषु पठित्वा विज्ञानमर्जयेत् वर्णोच्चारणशिक्षातः आयुर्वेदपर्यन्तं चतुर्दशविद्याः ३१ वर्षेषु परिसमापनीयाः।

एतद् अतिरिच्य समकालिकपाश्चात्यदेशेषु विकसत् आधुनिकभौतिकविज्ञानं औद्योगिकयन्त्राणां ज्ञानं भारतीया युवानः सम्यक् अधिगच्छेयुः तदर्थं प्रयत्नोऽपि स्वामिदयानन्देन विहितः शर्मण्य (जर्मनी) देशस्य विपश्चित् **जी.एस्.वाइस** इति महाशय आसीत् तेन सह स्वामिदयानन्दस्य पत्रव्यवहारो विद्यते। एषु पत्रेषु कथं भारतीया जर्मनीदेशं गत्वा तत्रत्यतन्त्रज्ञानं सम्पादयितुमर्हन्ति इति एतस्य विस्तरशः बोधोऽनयोर्मध्ये सञ्जातपत्रोत्तरमाध्यमेन ज्ञायते ।

स्वामिदयानन्दसाहित्ये शिक्षणपद्धतयः- महर्षिदयानन्दः सत्यार्थप्रकाशे तृतीये समुल्लासे व्याख्यानपद्धतिं दर्शयति तद्यथा अथ पठनपाठनविधिः इति शीर्षके महर्षिः प्राह -

" व्याकरणम् अर्थात् सर्वादौ अष्टाध्याय्याः सूत्राणां कण्ठपाठः ततः परं वृद्धिरादैच् इति सूत्रस्य पदच्छेदः, विभक्तिः, समासविग्रहः अर्थः ततश्च शब्दसिद्धिः यथा भागः नायकः, कारकः ....इत्यादयः "अनेन उद्धरणेन

In Public domain. Digitization Muthulakshmi Research Academy

सुतरामेतत् ज्ञायते यत् सूत्रार्थबोधाय व्याख्यानपद्धतिः७ प्रयोक्तव्येति।

प्रत्यक्षपद्धतिः - सुश्रुतशास्त्रे यथा शरीरावयवानामुल्लेखो विद्यते तदनुसृत्य शरीरस्य गात्राणि विशीर्य तद् अवलोकितव्यम् अनेन प्रत्यक्षपद्धतेः अपि च कृत्वाधिगमपद्धतेः (Learning by doing) बोधो भवति।

प्रयोगपद्धतिः - अर्थवेदः अथवा शिल्पशास्त्रं यथा विश्वकर्मणः त्वष्टुः मयस्य च संहिताग्रन्थाः सन्ति। एतान् षट्सु वर्षेषु अधीत्य तारभूगर्भविद्याः साक्षात् कुर्यात् अर्थात् प्रयोगं विधाय साक्षात्कारः कार्यः। श्रवणं मननं निदिध्यासनं साक्षात्कारः इति साधनचतुष्टयम्, इत्यस्य उल्लेख नवमसमुल्लासे मुक्तिसाधनेषु कृतम्। अपि च सत्यासत्यनिर्णयाय महर्षिदयानन्दः उवाच ___ पठनं पाठनं सम्यक् परीक्ष्य कर्तव्यं परीक्षा पञ्चधा भवति।

प्रथमा - यद् यद् ईश्वरस्य गुणकर्मस्वभावनुकूलम् अपि च वेदानुकूलं भवति तत्सत्यमन्यत् मिथ्या।

द्वितीया - यद् यत् , सृष्टिनियमानुसारं विज्ञानानुकूलं भवति तत् सत्यम् अन्यत् असत्यम्।

तृतीया - आप्तकथनं यथा धार्मिकः सत्यवादि निश्छलः परोपकारी विपश्चित् यद् यद् उपदिशति तत् सत्यं अन्यत् मिथ्या।

चतुर्थी - आत्मनः पवित्रता, विद्यायाः अनुकूलं तद्यथा आत्मनि रहसि सत्यासत्यप्रत्ययो भवति तथा निर्णेतव्यम्।

पञ्चमी - अष्टौ प्रमाणानि तानि च प्रत्यक्षम्, अनुमानम्, उपमानम्, आप्तोपदेशः (शब्दः) ऐतिह्यम् अर्थापत्तिः संभवः, अभावः।

प्रश्नोत्तरपद्धतिः - वाकोवाक्यपद्धतिः अथवा प्रश्नोत्तरपद्धतिः स्वामिदयानन्देन भृशं प्रयुक्ता। महाभाष्ये प्रयुक्त-वाक्योवाक्यपद्धत्याः प्रभावः स्वामिनः साहित्ये पदे पदे परिलक्ष्यते। भाष्यप्रमाणानि अपि असकृत् उदाहरति दयानन्दस्वामी।

संवादपद्धतिः (वार्तालापपद्धतिः) - महर्षिदयानन्दस्य प्रसिद्धग्रन्थः सत्यार्थप्रकाशः संवादपद्धत्या लिखितः विद्यते। अतः स्वामी इमां पद्धतिं पुरस्करोति इति इङ्गितेन चेष्टितेन, ग्रन्थलेखनव्यवहारेण ज्ञायते। एताः अतिरिच्य सूत्रपद्धतिः, स्मरणपद्धतिः (कण्ठपाठपद्धतिः) अपि निर्दिष्टा तद्यथा "यः वेदानां पाठमात्रं, स्वरान् च वेत्ति न तु अर्थम्......" इत्यादि ।

अनेन ज्ञायते वेदाध्ययनं वेदस्मरणं कण्ठपाठस्तु कर्तव्यः परम् अर्थज्ञानमपि अर्जनीयम्। स्वामिदयानन्दः अध्यापनमाध्यमं स्पष्टतया नोल्लिलेख परन्तु सङ्केतेन ज्ञायते हिन्दीभाषामाध्यमेन पाठनं भवेत्। परन्तु यदि पठनपाठनं संस्कृतमाध्यमेन स्वामिनः काले तदनुपरवर्तिनिकाले गुरुकुलेषु अभविष्यत्, तर्हि इदानीं वैदिकशास्त्राणां संस्कृतसाहित्यस्य संस्कृतभाषाभाषणप्रवीणाः विद्वांसः पुष्कला अभविष्यन्। प्रचारः प्रसारस्तु हिन्दीभाषया भवतु नाम परन्तु संस्कृतशास्त्राणामध्यापनं संस्कृतमाध्यमेनैव भवेत् ।

अन्तेवासिनाम् अनुशासनम् (कर्तव्यानि) -

(१.) अपोऽशान (२.) कर्म कुरु (३.) दिवा मा स्वाप्सीः (४.) आचार्याधीनो वेदमधीष्व (५.) द्वादश वर्षाणि प्रतिवेदं ब्रह्मचर्यं गृहाण वा ब्रह्मचर्यं चर (६.) आचार्याधीनो भवान्यत्राधर्माचरणात् (७.) क्रोधानृते वर्जय (८.) मैथुनं वर्जय (९.) उपरि शय्यां वर्जय (१०.) कौशीलवगन्धाञ्जनानि वर्जय (११.) अत्यन्तं स्नानं भोजनं निद्रां

In Public domain. Digitization Muthulakshmi Research Academy

जागरणं निन्दां लोभमोहभयशोकान् वर्जय (१२.) प्रतिदिनं रात्रेः पश्चिमे यामे चोत्त्थायावश्यकं कृत्वा दन्तधावनस्नानसन्ध्योपासनेश्वरस्तुतिप्रार्थनोपासनायोगाभ्यासान्नित्यमाचर (१३.) क्षुरकृत्यं वर्जय (१४.) मांसरूक्षाहारं मद्यादिपानं च वर्जय (१५.) गवाश्वहस्त्युष्ट्रादियानं वर्जय (१६.) अन्तर्ग्रामनिवासोपानच्छत्रधारणं वर्जय (१७.) अकामतः स्वयमिन्द्रियस्पर्शेन वीर्यस्खलनं विहाय वीर्यं शरीरे संरक्ष्योर्ध्वरेताः सततं भव (१८.) तैलाभ्यङ्गमर्दनात्यम्लातितिक्तकषायक्षाररेचनद्रव्याणि मा सेवस्व (१९.) नित्यं युक्ताहारविहारवान् विद्योपार्जने च यत्नवान् भव (२०.) सुशीलो मितभाषी सभ्यो भव (२१.) मेखलादण्डधारणभैक्ष्यचर्यसमिदाधानोदकस्पर्शनाचार्यप्रियाचरणप्रातःसायमभिवादनविद्या-संचयजितेन्द्रियत्वादीन्येते नित्यधर्माः। अपि च ऋतश्च स्वाध्यायप्रवचने ......तद्धितपस्तद्धि तपः .... एतादृशानि बहूनि सदाचारसंकीर्तनानि तत्र तत्र कृतानि सन्ति।

आचार्यान्तेवासिनां सम्बन्धः -

ब्रह्मचारी आत्मनः गृहं परित्यज्य विद्याध्ययननिमित्तम् आचार्यकुलं गुरुकुलं वा गच्छेत् तत्र गुरुकुले गुरुः शिष्यम् आत्मनः पुत्रमिव आचरति अतः पुत्रीयति आचार्यः शिष्यम् इति व्यवहारः किञ्च -

"आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं द्रष्टुमभिसंयन्ति देवाः।।" {अथर्व० का० ११ । सू० ५ म० १}

अपि च - **" ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति।**
आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते।। {अथर्व० का० ११ । सू० ५ म० ४}

आभ्यां वेदमन्त्राभ्यां गुरुशिष्ययोः सम्बन्धः कीदृशो वर्तत इति यथा जननीपुत्रयोः आत्मीयः स्नेहपूर्णः दृढघनिष्ठसम्बन्धो भवति। गुरुः छात्रेषु स्निह्यति। छात्राः श्रद्धया, भक्त्या गुरोः सेवां सुश्रूषां कुर्वन्ति। गुरोराज्ञां शिरसा वहन्ति। उक्तश्च **आज्ञाहि गुरूणामविचारणीया** इति।

स्वामिदयानन्दस्य शिक्षाविषयकं चिन्तनम् अद्वितीयम् अपूर्वं विद्यते तस्मात् सत्यार्थप्रकाशे संस्कारविधौ, ऋग्वेदादिभाष्यभूमिकायां व्यवहारभानौ च एतद् अतिरिच्य तत्र तत्र वेदभाष्ये अन्येषु ग्रन्थेषु गुरुशिष्यशिक्षणं वर्तनानि इमानि सर्वाणि भृशं प्रावोचत् दयानन्दस्वामी सत्यज्ञानाय सत्यार्थप्रकाशे जननाद् आरभ्य मरणपर्यन्तं मानवसंस्करणं निर्माणं संस्कारविधौ सत्यार्थप्रकाशे ऋग्वेदादिभाष्यभूमिकायां विशदतया दिग्दर्शनं स्वामिपादाः अकार्षुः।

स्वामिदयानन्दः मनुते यत् गुरुः शिष्यस्य सर्वाङ्गीणविकासाय सर्वविधहिताय यतेत शिष्योऽपि गुरुप्रियाचरणे रतो भवेत् एवं परस्परं प्रीत्या भावयेत् विद्याध्ययनाध्यापनं ब्रह्मचर्यं तपश्चरणं, लोकोपकारं च कुर्यात्। आचार्यः शिष्यस्य मानसपिता भवति तथैव शिष्यो गुरोः मानसपुत्रः भवति इह विद्याकृतसम्बन्धो भवति।

स्वामिदयानन्दस्य शिक्षावैशिष्ट्यानि -

१. आर्षानार्षविवेकः, ऋषिभिः प्रोक्तं कृतं वा निर्भ्रान्तं शास्त्रं पठनीयम्।
अनार्षग्रन्थजालानां परित्यागो कर्तव्यः येन अल्पेन आयासेन अल्पेन कालेन बहु समासादितं भवति।

२. वेदाः सर्वसत्यविद्यानाम् आकराः सन्ति वेदानामध्ययनम् अध्यापनं नः परमकर्तव्यम्।

३. वेदाध्ययनं केवलं पाठमात्रं स्मरणमात्रं न भवेत् अपितु स्वरशब्दार्थक्रियासहितं स्यात्८।

In Public domain. Digitization Muthulakshmi Research Academy

४. स्वावलम्बिनी अल्पव्ययसाध्या, विकेन्द्रिता, व्यक्तिशः सम्पर्कयुता, सदाचरणपूर्णा प्रकृत्यानुकूला, पर्यावरणेन सङ्गतो अल्पसाधनापेक्षिता, ऐहिकामुष्मिकफलदा विद्यते।

५. महिलानां शूद्राणां च कृते शिक्षा वेदाध्ययनाधिकारश्च ९।

६. सर्वेभ्यः समाना पक्षपातरहिता अनिवार्या निःशुल्का शिक्षा।

७. दर्शनानां सुव्यवस्थिताध्ययनक्रमः अपि च दर्शनपरम्परासु प्रचलितविरोधभावमपनीय तेषु सामञ्जस्य समन्वयस्थापनम्।

८. आन्तरिकबाह्यव्यक्तित्वविकासाय अपि च शैक्षिकबौद्धिकमानसिकाध्यात्मिकनैतिकगुणानां विकासाय पूर्णावकाशः।

९. मातापितरौ प्रति समाजं प्रति स्वदेशं प्रति लोकं प्रति प्रकृतिं प्रति आत्मानं प्रति, परमात्मानं प्रति उत्तरदायित्वपूर्णं शिक्षणम्।

१०. अल्पकालेऽनेकशास्त्राणि कलाः साहित्यं विज्ञानम् अधिगम्य नानाकौशलसम्पादनक्षमा अभ्रमाशिक्षा।

स्वामिदयानन्दस्य योगदानम् - एतस्मिन्नैव काले ग्रन्थलेखनकार्यं वेदभाष्यकार्यं अपि शास्त्राध्ययनं संस्कृतपाठशालास्थापनम् अकारि।

महर्षिदयानन्देन लिखिता इमे ग्रन्थाः -

१. पाखण्डखण्डनम्, १८६७, हरिद्वार कुम्भे, संस्कृतम्
२. सत्यधर्मविचारः, १८८०, शास्त्रार्थ, चाँदपुरमेला, हिन्दी
३. अद्वैतमतखण्डनम्, १८७०, काशी, संस्कृतम्
४. प्रतिमापूजनविचारः, १८७३, हुगलिशास्त्रार्थः हिन्दी
५. पञ्चमहायज्ञविधिः, १८७४, हिन्दी संस्कृतम्
६. सत्यार्थप्रकाशः, १८७४-७५, हिन्दी
७. आर्याभिविनयः १८७६, १०७ वेदमन्त्रव्याख्या, संस्कृतम्
८. वल्लभाचार्यमतखण्डनम्,१८७५, (वेदविरुद्धमतखण्डनम्) संस्कृतम्
९. स्वामिनारायणमतखण्डनम् १८७६, संस्कृतम्
१०. वेदान्तिध्वान्तनिवारणम् १८७६,
११. संस्कारविधिः १८७६, हिन्दी
१२. ऋग्वेदादिभाष्यभूमिका १८७७, हिन्दी - संस्कृतम्
१३. सत्यासत्यविवेकः १८७९, हिन्दी
१४. भ्रान्तिनिवारणम् १८७७, हिन्दी
१५. गोकरुणानिधिः हिन्दी
१६. संस्कृतवाक्यप्रबोधः १८८०, संस्कृतम्
१७. व्यवहारभानुः १८८०, हिन्दी

In Public domain. Digitization Muthulakshmi Research Academy

१८. शिक्षापत्रीध्वान्तनिवारणम् संस्कृतम्

१९. वेदाङ्गप्रकाशः- १४ (हिन्दी - संस्कृतम्)

(१) वर्णोच्चारणशिक्षा (२) सन्धिः (३) नामिकः (४) तद्धितम् (५) सामासिकः (६) अव्ययार्थः (७) आख्यातिकः (८) कारकम् (९) सौवरः (१०) पारिभाषिकः (११) उणादिकोशः (१२) गणपाठः (१३) निघण्टुः (१४) धातुपाठः

२०. भागवतखण्डनम्, १७६६, संस्कृतम्।

२१. संध्या, १८६३,

२२. यजुर्वेदभाष्यम् १८७८, सम्पूर्णम्।

२३. ऋग्वेदादिभाष्यम् ७-६२-२ पर्यन्तं भाष्यम्, अपूर्णम्।

२४. उपदेशमञ्जरी पूना प्रबन्धम्, १८७५, ।

२५. आर्योद्देश्यरत्नमालाः, १८७७।

२६. आत्मचरित, १८७५।

२७. गौतम अहिल्या की कथा।

२८. गर्दभतापनी उपनिषद्- अप्रकाशित।

२९. भ्रमोच्छेदनम्, १८८०, संस्कृतम्।

३०. अनुभ्रमोच्छेदनम् १८८०, संस्कृतम्।

३१. अष्टाध्यायीभाष्यम्।

३२. वार्तिकपाठसभाष्य।

३३. अष्टाध्यायी यादीपत्र (सूची पत्र)।

३४. प्राकृतसंस्कृत अनुवाद।

३५. महाभाष्यसंक्षेपः।

स्वामिदयानन्दसरस्वती स्वकीयजीवनकाले १५००० पृष्ठात्मकं लेखनम् अकार्षीत्। तेषां लघुबृहत् ग्रन्थानां संख्या ६६ वर्तते। ग्रन्थलेखनं संस्कृतभाषया हिन्दीभाषया च वर्तते।

स्वामिदयानन्देन स्थापिताः संस्कृतपाठशालाः -

१. संस्कृतपाठशाला १८६९ फर्रूखाबाद, लाला पन्नीलाल/दयानन्द।

२. संस्कृतपाठशाला १८७१ कासगंज, स्वामिदयानन्दः।

३. संस्कृतपाठशाला १८७० मिर्जापुर, चौधरी गुरुचरण।

४. संस्कृतपाठशाला १८७० छलेसर, स्वामिदयानन्दः।

५. संस्कृतपाठशाला १८७३ काशी स्वामिदयानन्दः।

स्वामिदयानन्दः स्वकीयजीवनकाले नैकानार्यसमाजान् स्थापयामास। तदनु तस्य अनुयायिनः भारते विदेशे च सहस्राधिकान् आर्यसमाजान्, गुरुकुलानि, कन्यागुरुकुलानि अनाथसदनानि, शोधसंस्थानानि स्थापितवन्तः। गुरुकुलेषु गुरुकुलकाङ्गडी, ज्वालापुर महाविद्यालयः, वृन्दावन गुरुकुलं, इन्द्रप्रस्थ गुरुकुलम्, पाणिनि

In Public domain. Digitization Muthulakshmi Research Academy

महाविद्यालयः रेवली। एटा गुरुकुलम्, गुरुकुल प्रभात आश्रमः, पाणिनिकन्यामहाविद्यालयः, वाराणसी यत्र सहस्रशः छात्राः संस्कृतशास्त्राध्ययनं कुर्वन्ति।

शोधसंस्थानानि, न्यासाः -

१. विश्वेश्वरानन्द वैदिकशोधसंस्थान होशियारपुर

२. वेदसंस्थान, अजमेर

३. विश्ववेदपरिषद्, लखनऊ

४. वैदिकसंस्थान, नजीबाबाद

५. भारतीयप्राच्यविद्याप्रतिष्ठान, रेवली, रामलालकपूर ट्रस्ट, रेवली

६. प्राच्यविद्यानुसन्धान केन्द्र नाँगलोई

७. त्रैतवादीय आर्यपीठ ज्वालापुर, हरिद्वार

८. आर्ष साहित्य प्रचार ट्रस्ट दिल्ली

स्वामिदयानन्दस्य निर्वाणानन्तरं स्वामिनः स्मृतिरूपेण ईस्वीयाब्दे १८८६ डी.ए.वी. इति शिक्षासंस्थायाः आरम्भः जातः। साम्प्रतं ६६७ महाविद्यालयाः सन्ति। तेषु ४६१ उच्चमाध्यमिक-विद्यालयाः सन्ति यत्र संस्कृतम् पाठ्यते। इत्थं स्वामिदयानन्दस्य शैक्षिकक्षेत्रे कृतं योगदानं दिङ्मात्रमत्र दर्शितम्।

सन्दर्भग्रन्थाः -

१. सत्यार्थप्रकाशः, स्वामिदयानन्दः, आर्यधर्मार्थन्यासः

२. संस्कारविधिः, स्वामिदयानन्दः, रामलालकपूरट्रस्ट रेवली

३. ऋग्वेदादिभाष्यभूमिका, स्वामिदयानन्दः, वैदिकयन्त्रालयः अजमेर

४. व्यवहारभानुः, स्वामिदयानन्दः, वैदिकयन्त्रालयः अजमेर

५. आर्यसमाज का इतिहास, सत्यकेतुविद्यालङ्कार, आर्य स्वाध्याय केन्द्र, नई दिल्ली

६. मनुस्मृतिः डाँ. सुरेन्द्र, आर्ष साहित्य प्रचार ट्रस्ट, दिल्ली

७. अष्टाध्यायी प्रथमावृत्तिः, पं. ब्रह्मदत्त जिज्ञासु, रामलालकपूरट्रस्ट रेवली

८. षड्दर्शनसमन्वय एक नवीन वैज्ञानिक दृष्टिः डा. प्रशान्त आर्यः, विजयकुमार गोविन्दराम हासानन्द दिल्ली

९. A Critical study of the contribution of the Arya samaj to Indian Education, Saraswati S. Pandit , Sarvadeshik Arya pratinidhi Sabha Delhi,

१०. दयानन्द के पत्र विज्ञापन, पं. युधिष्ठिर मीमांसक रामलालकपूर ट्रस्ट

११. यजुर्वेदः वैदिकयन्त्रालयः, अजमेर

१२. विश्वधर्मकोशः, डाँ. भवानीलालभारतीय, विजयकुमार गोविन्दराम हासानन्द दिल्ली

****

In Public domain. Digitization Muthulakshmi Research Academy

महर्षिदयानन्दसरस्वतिमहोदयस्य शैक्षिकविचाराः

Concepts of Dayananda Saraswati In Education

Dr. D. Venugopal Rao

"जन्तूनां नरजन्म दुर्लभम्". इति शङ्कराचार्यस्य वाच्छ्रवणेनैव संसारेऽस्मिन् मानवस्यानिर्वचनीयत्वं ज्ञायते। मानववैशिष्ट्यकारणादेव मानवानां समूहः समाज इति, अन्येषां समूहः समज इति लोकव्यवहारः। तथाऽपि लोकेऽस्मिन् महतां, जनहितैषिणां, समाजोद्धारकानां, मानवानाञ्च जन्मातीवदुर्लभं विरलञ्च भवति। तदेव श्रीशङ्कराचार्यः आह –

शान्ता महान्तो निवसन्ति सन्तो वसन्तवल्लोकहितं चरन्तः ।
तीर्णाः स्वयं भीमभवार्णवं जनानहेतुनान्यानपि तारयन्तः ।। इति ।

इत्थमसंख्याकानां महर्षिणां, मुनीनां, जनहितैषिणां महतां विदुषाञ्च जननीयं भारतभूमिः। "अत्रापि भारतं जन्म जम्बूद्वीपे महामुनेः" इति भागवतोक्तरीत्या भारते लब्धजन्मानः सुरकीर्तिताः प्राप्तयशस्विनः महान्तश्च केचन महापुरुषाः जनहृदयेषु विराजन्ते। अत एवाह यत्–

गायन्ति देवाः किल गीतिकानि धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयःपुरुषाः सुरत्वात् ।।इति।।

इत्थं सुरकीर्तितेषु भारतीयमहापुरुषेष्वद्वितीयाः, अग्रगण्याश्च विद्यन्ते महर्षिदयानन्दसरस्वति महोदयाः। "स जातो येन जातेन याति वंशः समुन्नतिम्" इति लोकोक्तेः उदाहरणभूताः स्वजन्मना, स्वीयासाधारणाध्यात्मिकव्यक्तित्वेन च समेषां भारतीयानामादर्शभुताश्चामी भवन्ति । अत एवोच्यते भगवता –

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत्प्रमाणंकुरुते लोकस्तदनुवर्तते ।।इति।।

शैक्षिकविचाराः योगदानञ्च – इमे बाल्यावस्थायामेकस्मिन् शिवरात्रपर्वदिने शिवलिङ्गोपरि क्रीडन्तं मूषकं दृष्ट्वा कथमयं सर्वेश्वरः तस्य निवारणे अशक्तः स्तब्धोऽस्तीति अतीवतर्कबुद्ध्या शाश्वतसत्यान्वेषणे रतास्सञ्जाताः। पितुरादेशानुगुणमाबाल्यादेव कठोरब्रह्मचर्यव्रतपालनपुरस्सरं वेदवेदाङ्गानां सकलशास्त्राणाञ्चाध्ययनं चक्रुः। अनुजायाः पितृव्यस्य च हठान्मरणप्रभावात् लोकेऽस्मिन् जननमरणादिकम् अतीवसहजमिति प्राप्तवैराग्यभावनया शाश्वतसत्यान्वेषणचिन्तापरः शङ्करः स्वामिविरजानन्दं योग्यगुरुत्वेन प्राप्य तैर्दत्तादेशपरिपालनपुरस्सरं वैदिकपरम्परायाः, धार्मिकव्यवस्थायाः भारतीयसंस्कृतेश्च पुनर्व्यस्थीकरणाय वादिविवादपूर्वकं तत्तद्देशविदुषां मतखण्डनेन सह मुम्बई नगरे "आर्यसमाजं" स्थापयामास। वैदिकधर्मं प्रामाणिकरूपेण स्वीकृत्य वैदिकधर्मस्य पुनरुत्थानार्थं पाश्चात्यसंस्कृतेः निराकरणाय कृतभूरिपरिश्रमाः कटिबद्धाश्चेमे भवन्ति। क्रमेऽस्मिन् ऋग्वेदभाष्यं, यजुर्वेदभाष्यं, ऋग्वेदादिभाष्यभूमिका, सत्यार्थप्रकाशः, संस्कारविधिः, गोकरुणानिधिः, व्यवहारभानुः, आर्याभिविनयः इत्यादयः ग्रन्थाः अपि तैः लिखिताः।

In Public domain. Digitization Muthulakshmi Research Academy

इमे भारतीयसनातनवैदिकसंस्कृतेः परम्परायाः आध्यात्मिकतायाश्च पुनर्व्यवस्थीकरणे कृतभूरिपरिश्रमाः वर्तन्ते। एतेषां सत्यान्वेषणपूर्वकविचाराः दार्शनिकचिन्तनानि च भारतीयसमाजस्य परिवर्तने, दिशानिर्देशने शिक्षा सम्प्रति सर्वेषामाधारभूता वर्तते। अस्याः शिक्षायाः शैक्षिकव्यवस्थायाश्चाभिवृद्ध्यर्थं तत्तत्कालानुगुणं महतां दार्शनिकाणाञ्च विचाराः सुग्राह्याः एव। भारतीयवैदिकपरम्परायां बलं प्रदाय भारतीयशैक्षिकसंरचनायाः प्रोन्नयने अमीषां योगदानं वरीवर्ति।

अत एव शोधपत्रेऽस्मिन् महर्षिदयानन्दसरस्वतिमहोदयस्य सत्यान्वेषणपूर्वकदार्शिनिकचिन्तनानुगुणं सत्स्वपि अनेके शैक्षिकविचाराः तत्र शैक्षिकव्यवस्था अनुशासनमिति विषयद्वयं विचार्यते।

शैक्षिकव्यवस्थायाः संरचना–

विद्वत्त्वं च नृपत्त्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।। (चाणक्यनीतिसूत्रम्)

अनेन ज्ञायते यत् शिक्षयैव मानवः सर्वत्र यशस्वी, सम्मानितो भवतीति। सैव शिक्षाऽधुना सामाजिकप्रतिनिधिसंस्थासु शैक्षिकव्यवस्थेति व्यवह्रियमाणे विद्यालये नियन्त्रितरुपेण प्रदीयते। व्यवस्थेयं नूतना, पाश्चात्यचिन्तनमयी च न तु भारतीया। भारतीयप्राचीनशैक्षिकव्यवस्थाऽपि नियन्त्रिता, अध्यापकाधीना वेदवेदाङ्गानां सकलशास्त्राणामध्ययनसंस्थात्वेन च आसीत्। वैदिकधर्ममाश्रित्यप्रतिपादितेयं भारतीयशैक्षिकव्यवस्था भारते वैदेशिकानां प्रवेशात् रूपान्तरिता। तत्र तावत् वैदेशिकानां केषाञ्चन भारतीयानाञ्च वैदिकधर्मे अविश्वासः, धार्मिकव्यवस्थायाः अन्धानुकरणं वेदप्रतिपादितविषयावगाहने सद्बुद्धेरभावः इत्यादीनि कारणानि आसन्। साम्प्रतिकभारते बहुभिः महद्भिः दार्शनिकैः, मनोवैज्ञानिकैः, सामाजिकैश्च निर्धारितेयं शैक्षिकव्यवस्था बहुविधसमस्योत्पादकीव सन्दृश्यते। तत्र एकत्रैव बालबालिकानां सामूहिकाध्ययनं, विद्यालयाद्बहिः अध्यापकानां निवासः, छात्राध्यापकयोर्मध्ये सुसम्प्रेषणस्य अभावः, यत्र कुत्रापि विद्यालयानां स्थापनम्, इत्यादीनि समस्योत्पादने कारकाणीति कथने न विप्रतिपत्तिः। अत एव सम्प्रति शैक्षिकव्यवस्थासु असामाजिककार्यक्रमाः कलहाः, बलात्कारहननमित्यादयः मूल्यसंक्षोभकार्यक्रमाः अधिकतया जायन्ते। अनेन साम्प्रतिकशैक्षिकव्यवस्थासु शिक्षाप्राप्तिः मूल्यरहिता, ज्ञानविहीना, कष्टसाध्या च वर्तते। बालिकाः विद्यालयं प्रेषणाय अभिभावकाः अपि संशयशीलाः सन्ति। अस्यां स्थितौ भारतीयसंस्कृतेः सभ्यतायाः, सनातनधर्मस्य, परम्परायाश्च संरक्षणे सर्वेऽपि चिन्तयेयुः।

समयेऽस्मिन् सत्यान्वेषणतत्पराणां, दूरदर्शिणां वैदिकधर्मदृढीकरणे कटिबद्धानां महर्षिदयानन्दसरस्वतिमहोदयानां सप्रामाणिकतार्किकवैदिकधर्मनिष्ठाशैक्षिकव्यवस्थैव मानवकल्याणकारी समाजोपयोगीनी चेति कथने नातिशयोक्तिः। तैः प्रतिपादितशैक्षिकव्यवस्थासम्बन्धविषयास्तु **"सत्यार्थप्रकाशः"** इत्यस्मिन् ग्रन्थे द्वितीयतृतीयसमुल्लासयोः वर्तन्ते। ते तु

१. पञ्चवर्षेभ्यः बालबालिकाभ्यः प्राथमिकशिक्षा मातापितृभ्यां कुलश्रेष्ठाभ्याञ्च दातव्या। तत्रापि विशिष्य मातुः स्थानमनिर्वचनीयम्। **"प्रशस्ता धार्मिकी विदुषी माता विद्यते यस्य स मातृमान्"** ।

२. शिक्षकेनैव बालकः सुशिक्षितो न भवति। तत्र माता –पिता – गुरूः त्रयोऽपि गुरुस्थानीयाः भवन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

"मातृमान् पितृमानाचार्यवान् पुरुषो वेद" । (शतपथ– १४–५–८२)

३. पञ्चवर्षेभ्यः पूर्वमेव मौखिकरूपेण भाषणं– श्रवणं–स्पष्टोच्चारणमित्यादिषु बालकं प्रेरयेत्। असमीचीनकार्येषु यथा न प्रवेशः तथा मार्गोपदेशः करणीयः।

४. पञ्चवर्षानन्तरं विस्तृतज्ञानावाप्तये बालबालिकाः विद्यालयमवश्यं प्रेषणीयाः। अध्यापकाधीनाः निश्चितज्ञानप्राप्तये दक्षाः स्युः। विद्यालयप्रवेशानन्तरं छात्रैस्सहाभिभावकानां सम्बन्धः न स्यात्। ये बालबालिकाः न प्रेषयन्ति ते दण्डनार्हाः भवन्ति। "गुरौ वसन् सञ्चिनुयात् ब्रह्माधिगमिकं तपः" । (मनु–२–१६४)

५. बालकाः बालकविद्यालयं, बालिकाः बालिकाविद्यालयं प्रेषणीयाः। शैक्षिकव्यवस्था बालकबालिकाभ्यः पृथग् पृथग् भवेत्। अध्यापकाः अपि बालकेभ्यः पुरुषाः, बालिकाभ्यः महिलाः एव स्युः। न केवलमध्यापकाः कर्मकराश्च विद्यालयानुगुणं भवेयुः। तत्रापि योग्याध्यापकाः स्वीकरणीयाः।

६. शैक्षिकव्यवस्था तु सुन्दरप्रदेशे, एकान्तेस्थाने नगरात् द्वित्रिकोशपरिमिते दूरे सुविशाला, योग्या च स्यात्। बालबालिकाभ्यः सम्मिलितशैक्षिकव्यवस्था न स्यात् यथा उभयोः दर्शनं, स्पर्शनं, भाषणं, सेवा क्रीडनमित्यादयः शिक्षासमाप्तेः यावत् भवितुं नार्हन्ति तथा दूरप्रदेशेषु बालबालिकाभ्यः शैक्षिकव्यवस्था स्थापनीया।

७. तत्तच्छैक्षिकव्यवस्थासु बालबालिकाभ्यः वास–भोजन–वस्त्र–पठन–पाठन–अनुशासनमित्यादिषु विषयेषु कुलमतभेदाभावेन समानावकाशाः कल्पनीयाः सर्वावस्थासु अध्यापकाः संरक्षकरूपेण उपदेशकरूपेण च विद्यालये एव स्युः। " कन्यानां सम्प्रदानं च कुमाराणां च रक्षणम् " .

८. छात्रैस्सह शिक्षकाः अपि शैक्षिकव्यवस्थास्वेव वसेयुः, पठेयुः पाठयेयुः अद्युश्च। 'गुरोरुच्छिष्टभोजनम्'

९. शैक्षिकव्यवस्थायां सर्वेऽपि स्वस्वकार्येषु निरताः भवेयुः। तथापि शैक्षिकव्यवस्थायाः लक्ष्यसम्पादनाय, विकासाय च सम्भूय, सहयोगेन च कार्यं कुर्युः।

यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ।।
सर्वं परवशं दुखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात्समासेन लक्षणं सुःखदुःखयोः ।। (मनु–४–१५९–१६०)
सभ्यः सभां मे पाहि ये च सभ्याः सभासदः । (अ का –१९–अनु ७ सू ५५ मं ६)

शैक्षिकव्यवस्थायामनुशासनम् – शैक्षिकव्यवस्थायाः पाठ्यप्रणाल्याश्च विकासः छात्राध्यापकयोः उभयोः अनुशासितव्यवहारस्योपरि आधारितो भवति। प्राचीनात् अद्यावध्येतस्य अनुशासितव्यवहारस्योपरि आधारितो भवति। प्राचीनात् अद्यावध्येतस्य अनुशासनस्य महत्त्वं सर्वेष्वपि क्षेत्रेषु सर्वैरपि अङ्गीक्रियते। इदमनुशासनमेव सर्वावस्थासु मानवस्याद्वितीयव्यक्तित्वप्रतिपादने महदुपकरोति। विद्याविहीनः पशुः इतिवत् अनुशासनरहितोऽपि मानवः पशुतुल्य इति शिक्षाविदाम्मतिः । अत एव अनुशासनमिति शब्दः आत्मनियन्त्रणम्, इन्द्रियनिग्रहः, स्वायत्तीकरणं, व्यवस्थीकरणम् इत्यादिषु मानवसम्बन्धविषयेष्वेव उपयुज्यते । इदमनुशासनं मानवस्य जन्मजातं सहजसिद्धं च लक्षणं न भवति। परन्तु जन्मप्राप्तेः परं देशकालपरिस्थितीनां प्रभावात् मानवः अनुशासितः भवति।

क्रमेऽस्मिन् अनुशासनसम्पादने समाजस्य शिक्षायाश्च प्रभावः अनिर्वचनीय इति दार्शनिकानामभिप्रायः।

परिवर्तमानेऽस्मिन् समाजे शिक्षैव, मानवस्य लक्ष्यप्राप्तये व्यवहारपरिवर्तने, मार्गप्रदर्शने, अनुशासने च साधनत्वेन वरीवर्ति। शैक्षिकव्यवस्थायां शिक्षया यः छात्रः अनुशासितो भवति स एव सर्वाङ्गीणविकासमाप्नोतीति विदुषाम्मतिः। सम्प्रत्यस्य अनुशासनस्य अभावादेव शैक्षिकव्यवस्था पङ्ग्ववस्थां सम्प्राप्तेति कथने नातिशयोक्तिः। तासु शैक्षिकसंस्थासु छात्राध्यापकानुशासनव्यवस्था समीचीना न भवति। विषयेऽस्मिन् वैदिककालादारभ्य अद्यावधि बहुभिः दार्शनिकैः मनोवैज्ञानिकैश्च भिन्नाभिप्रायाः प्रकटिताः । तत्र दमनात्मकं, प्राकृतिकं, मुक्त्यात्मकमिति अनुशासनप्रकारत्रयं शैक्षिकव्यवस्थासु दरीदृश्यते। साम्प्रतिकविद्यालयेषु मनोवैज्ञानिकानां चिन्तनानुगुणं प्राकृतिकं, मुक्त्यात्मकञ्चाधिकाधिकरूपेण स्वीक्रियते। अनेन छात्रेषु सम्पूर्णमूर्तिमत्त्वविकासः दुस्साध्य इति शैक्षिकव्यवस्थायां सर्वैरपि शिक्षकैरनुभूयते। विषयेऽस्मिन् निगमागमसारप्रत्यक्षानां, स्वतस्सिद्धचिन्तनपूर्वकसत्यान्वेषकाणां महर्षिदयानन्दसरस्वतिमहोदयानां कथनमनिवर्चनीयं औपचारिकञ्च विद्यते। तत्र "सत्यार्थप्रकाशः" इत्याख्ये ग्रन्थे पठनपाठनराजधर्मविषयाणां विश्लेषणे, अनुशासनपूर्वकसमस्यानामुत्तरप्रदाने च बहवः अनुशासनविचाराः सतर्कं प्रतिपादिताः। तत्र षष्ठे समुल्लासे –

लोभान्मोहाद्भयान्मैत्रात्कामात्क्रोधात्तथैव च ।
अज्ञानाद् बालभावाच्च साक्ष्यं वितथमुच्यते ।।
एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् ।
तस्य दण्डविशेषास्तु प्रवक्ष्याम्यनुपूर्वशः ।।
लोभात्सहस्रदण्ड्यस्तु मोहापूर्वन्तु साहसम् ।
भयाद् द्वौ मध्यमौ दण्ड्यौ मैत्रापूर्वं चतुर्गुणम् ।।
कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानाद् द्वे शते पूर्णे बालिश्याच्छतमेव तु ।।
अनुबन्धं परिज्ञाया देशकालौ च तत्त्वतः ।
साराऽपराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ।।
अधर्मदण्डं लोके यशोघ्नं कीर्तिनाशनम् ।
अस्वर्ग्यञ्च परत्रापि तस्मात्तत्परिवर्जयेत् ।।
अदण्ड्यान्दण्डयन् राजा दण्ड्याश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकं चैव गच्छति ।। (मनु–८–११८–१२८)

इत्थं मनुस्मृतिं सप्रामाणिकं प्रदर्श्य दण्डनात्मकनियमा अनुशासनसंरक्षणोपायाश्च महर्षिदयानन्दसरस्वतिमहोदयैः प्रतिपादिताः। तत्तद्देशकालपरिस्थितिमनुसृत्य राज्यपालनसम्बन्ध– राजकार्येषु इमे विषयाः सामाजिकव्यवस्थासु नियमोल्लङ्घने–विलम्बे–दुष्कार्यादिषु बहुविधविषयेषु दरीदृश्यन्ते। शैक्षिकव्यवस्थायामपि व्यवस्थेयं केषुचित् विषयेषु (आवेदने विलम्बः, परीक्षासु अनुत्तीर्णता,

In Public domain. Digitization Mothulakshmi Research Academy

उपस्थितेरभावः) विरलतया विद्यते एव। एतादृशी धनपूर्वकदण्डनव्यवस्था शैक्षिकव्यवस्थायां न केवलं छात्राणां, तेषां समस्यानां विषये अपि च सर्वेषां विषये स्यात्। अनेनापि शैक्षिकव्यवस्थायां सम्पूर्णतयानुशासनं साध्यं न भवति। परन्तु पञ्चाशत् प्रतिशतं शैक्षिकानुशासनसम्पादनं निश्चितं भवति। यतोऽहि आनन्दमयजीवनायैवेयं शिक्षा, आनन्दमयजीवनं त्वाधुनिककाले धनसाध्यमिति, धनमेव मानवं सर्वत्र प्रेरयतीति "धनमूलमिदं जगत्" इति वाक्येन ज्ञायते। अतः शैक्षिकव्यवस्थायां छात्राध्यापकौ उभावपि तत्तत्कार्येषु अनया धनपूर्वकदण्डनानुशासन व्यवस्थया अनुशासितौ भवतः। एव मेव –

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।
वाक्चैव मधुरा श्लक्ष्णा प्रजोज्या धर्ममिच्छता ॥ (मनु–२–१५६)
यस्य वाङ्मनसे शुद्धे सम्यग्गुप्ते च सर्वदा।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम् ॥ (मनु–२–१६०)

अनेन ज्ञायते यत् शैक्षिकव्यवस्थायाम् उत्तमानुशासनस्य सम्पादने दण्डनं, स्वातन्त्र्यं नोपकारकम्, परन्तु उपचारात्मकं सत्यपूर्वकं मार्गोपदेशनं महदुपकरोतीति। तथाऽपि आचार्येण दण्डनस्यापि महत्त्वमङ्गीक्रियते।

यत– **सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः।**
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ॥ (महाभाष्यं–८/१/१)

इति महाभाष्यकारोक्तरीत्या बालकस्य अभिवृद्धये अनुशासनाय च लालनापेक्षया ताडनस्यैव प्राधान्यं वर्तते। मातापितरौ, अध्यापकाश्च द्वेषभावेन न ताडयेयुः परन्तु व्यवहारवर्धकभयोत्पादने दक्षाः स्युः। यतः मानवमूलप्रवृत्तीषु भीतिरपि मानवव्यवहारपरिवर्तने कारणत्वेन मनोवैज्ञानिकैः अङ्गीकृता। इत्थम्महर्षिभिः अनुशासनस्थापने संरक्षणे च सत्यान्वेषणपूर्वकं बहुषु विषयेषु स्वीयाभिप्रायानुगुणं लोककल्याणकारकश्च मार्गः उपदिष्टः। सत्स्वपि बहुविचारेषु उत्तमोत्तमानुशासनस्य सम्पादने अयं क्रमः अनुसर्तव्यः इति बहुधा प्रकटितः। स तु

वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम्।
तृतीयं धनदण्डं तु वधदण्डमतः परम् ॥इति। (मनु–८–१२९)

आधुनिकाः दार्शनिकाः मनोवैज्ञानिकाश्च विषयेऽस्मिन् भिन्नमनस्काश्चेदपि क्रमोऽयं वर्तमानकालिक–शैक्षिकव्यवस्थायां छात्राध्यापकयोः उभयोः व्यवहारपरिवर्तने, अनुशासनसम्पादने च अत्युत्तमो भवतीति कथने नातिशयोक्तिः।

इत्थं महर्षिदयानन्दसरस्वतिमहोदयैः प्रतिपादिताः वैदिकधर्मप्रमाणसहिताः शैक्षिकविचाराः बहवः आचरणयोग्याः इति केचन अयोग्याः कष्ठसाध्या इत्यन्ये मन्यन्ते। परन्तु यत्तदग्रे **विषमिव परिणामेऽमृतोपमम्** इति गीतोक्तरीत्या समेऽपि एते विषयाः अमृततुल्याः समाजोपकारकाश्चेति मे मतिः।

****

In Public domain. Digitization Muthulakshmi Research Academy

स्वामिदयानन्दसरस्वतिवर्यः आर्षपाठ्यचर्यारूपरेखाश्च

Swamy Dayananda Saraswati and Arsha Curriculum Frame Work

Dr. Somanath sahu

एकोनविंशतितमः शताब्दीकालः भारतीयेतिहासस्य सूचिभेद्यान्धकारयुगमासीत् इति कथने नातिशयोक्तिः। भारतीयभाग्याकाशस्तस्मिन् कालेऽविद्या अज्ञानान्धकारयोघार्घटाभिराच्छन्नोऽवर्तत। समाप्तिप्राया आसीत् सकलकल्याणकारिणी विश्वब्रह्माण्डपोषिणी वैदिकसंस्कृतिः, महिमामयजीवन–मूल्ययुता शीलसम्भृता आर्यसभ्यता च। अथ च तां वैदिकसंस्कृतिं सभ्यताञ्च समूलमुन्मूलयितुं तत्कालीन वायसारायस्य शिक्षा–परामर्श–दाता लार्ड मेकाले अति प्रयत्नपरोऽभूत्। फलतः परमप्रभोरनुकम्पया युगपुरुषो देवर्षिर्दयानन्दसरस्वति सकलमानवजगज्जीवनं समुज्ज्वालनाय पाषण्डततीः समुन्मूलनाय आर्षीशिक्षाप्रणाल्याः समुद्धरणाय च पुण्येऽहनि आविर्बभूव। स वेदाध्ययनमार्याणां परमकर्तव्यमित्यमन्यत। वेदा एवार्यजातेः प्रमाणत्वेन सम्मान्या ग्रन्थाः सन्ति इत्येवं सोऽघोषयत्। स आर्षपद्धतिमनुसृत्यसमग्रपाठ्यचर्यारूपरेखां प्रावर्तयत्। तदीयाः पाठ्यचर्यारूपरेखाः 'सत्यार्थप्रकाशः' "ऋग्वेदादिभाष्यभूमिका" "संस्कृतवाक्यप्रबोधः" इत्यादिग्रन्थेषु प्रतीताः भवन्ति।

दयानन्दमहर्षिणा उक्तपाठ्यचर्यारूपरेखा अतीव विस्तृतः व्यापकश्चास्ति। शिक्षार्थिनस्ते सर्वेऽनुभावाः पाठ्यचर्यायां निहिताः सन्ति, यान् स गरुकुलाद् बहिः गुरुकुले वा प्राप्नोति। ब्राह्ममुहूर्ते जागरणं सन्ध्योपासनं गायत्रीजपाचरणं, योगाभ्यासाद्याचरणं यमनियमादिपालनं मेखलाधारणं भिक्षाटनं, गुरुशुश्रूषया वेदवेदाङ्गादीनाञ्चाध्ययनम् इत्याद्यनेके पाठ्यचर्यायामन्तर्भवन्तीति।

तत्र अध्ययनक्रमे प्रथमं पाणिनिमुनिविरचिता सूत्ररूपा शिक्षापद्धतिरध्येतव्या। तदनन्तरं व्याकरणमर्थात् प्रथममष्टाध्याय्याः सूत्रपाठं, "वृद्धिरादैचिति" ततः पदच्छेद–समासार्थोदाहरण–व्याख्यादिकं क्रमेणाध्यापयेत्। एवं प्रथममष्टाध्यायीमध्याप्य तदनु सार्थकं दशलकाररूपं प्रक्रियासहितमुत्सर्गापवादपुरस्सरं धातुपाठमध्यापयेत्। धातुपाठस्यानन्तरमुणादिकोशाध्यापने सकलसुंबन्तविषयं सम्यगध्यापयेत्। अनन्तरं महाभाष्यं पाठयेत्। अत्र स्वामिचरणाः वदन्ति यत् बुद्धिमन्तः पुरूषार्थिनो निश्चला विद्योन्नतिमभिप्सवः सततमधीयीरन् चेत् सार्धसंवत्सरेणाष्टध्यायी सार्धसंवत्सरेण च महाभाष्यमधीत्य वर्षत्रयेण निखिलं व्यकारणमधिगम्य वैदिक–लौकिकशब्दान् व्याकारणेन विज्ञाय अन्यशास्त्राणि शीघ्रमनायासेनैवाध्येतुं शक्नुवन्ति। व्याकरण एव महान् परिश्रमोऽपेक्ष्यते नान्येषु पुनः शास्त्रेषु। यावान् बोधः एतद्ग्रन्थाध्ययनेन वर्षत्रये सञ्जायते न तावान् बोधो सारस्वत–चन्द्रिका–कौमुदि मनोरमादीनामध्ययनेन पञ्चाशत्संवत्सरेष्वपि शक्नोति भवितुम्।

व्याकरणमधीत्य यास्कमुनिकृते निघण्टुनिरुक्तशास्त्रे षड्भिरष्टाभिर्वा मासैः सार्थकेऽध्येतव्ये। तदनन्तरं पिङ्गलाचार्यकृतछन्दोग्रन्थेन वैदिकलौकिकछन्दसां परिज्ञानं, नव्यरचनां, श्लोकनिर्माणसरणिमपि यथावच्छिक्षेयुः। ग्रन्थममुं पद्यरचनाकौशलं प्रस्ताराँश्च मासचतुष्टयेन परिज्ञायाध्येतुमध्यापयितुं च शक्नुवन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

ततो मनुस्मृतिं वाल्मीकिरामायणं महाभारतोद्योगपर्वान्तर्गतविदुरनीतिप्रमुखानि दुर्व्यसनापहारीणि सभ्यताजनकानि सत्प्रकरणानि काव्यमर्यादया पदच्छेदपदार्थोक्ति–अन्वय–विशेष्य विशेषणभावार्थपुरस्सरं गुरवः शिक्षयेयुरन्तेवासिनश्च शिक्षेरन्। सर्वमप्येतत् संवत्सरेणाधीयीरन्।

तदनन्तरं पूर्वमीमांसा–वैशेषिक–न्याय–योग–सांख्यवेदान्ताख्यानिषट् शास्त्राणि यथासम्भवमृषिप्रणीत–व्याख्यायुतानि, उत्तमविदुषां सरलव्याख्यायुक्तानि वाऽधीयीरन्, परं वेदान्तसूत्राध्ययनतः पूर्वम् ईश– केन–कठ– प्रश्न मुण्डक– माण्डूक्य– ऐतरेय – तैत्तिरीय –छान्दोग्य– बृहदारण्यकाख्या दशोपनिषदोऽध्येतव्या। इमा दशोपनिषदो भाष्यवृत्तिसहितानि षड्दर्शनानि च वर्षद्वयेन अध्याप्याध्येयानि च।१

पूर्वमीमांसायां व्यासमुनिप्रणीतव्याख्या, वैषेशिकशास्त्रे गौतममुनिकृतभाष्यम्, न्यायसूत्रेषु वात्स्यायनमुनिकृतभाष्यम्, पतञ्जलिमुनिकृतसूत्रेषु व्यासमुनिकृतभाष्यम् कपिलमुनिकृतसांख्यसूत्रेषु भागुरिकृतभाष्यम् व्यासमुनिकृतवेदान्तसूत्राणामुपरि वात्स्यायनमुनिकृतभाष्यं, वा बौद्धायनमुनिकृतभाष्यञ्च वृत्तिसहितमध्येतव्यम् अध्यापयितव्यम्।२

पश्चात् ऐतरेय–शतपथ–साम–गोपथाख्यैश्चतुर्भिर्ब्राह्मणैः सहितान् सस्वरशब्दार्थसम्बन्ध–विज्ञानं सक्रियञ्च चतुरो वेदान् षड्भिरङ्गैरधीयीरन्। यत्किञ्चदपि अध्येयमध्याप्यं वा तत्सर्वमर्थज्ञानयुतं भवेत्। अनया रीत्या सर्ववेदानधीत्य आयर्वेदं – चरकसुश्रुतादिकमृषिमुनिप्रणीतवैद्यकशास्त्रं सार्थकं क्रिया शस्त्र–छेदन–भेदन–लेप–चिकित्सा–निदान–औषध–प्रथ्यशरीर– देशकालवस्तूनां गुणज्ञानपूर्वकं वर्षचतुष्टयेनाधीयीरन् अध्यापयेयुश्च।

तदनन्तरं धनुर्वेदं राष्ट्रसम्बन्धिकार्यजातम् निजराजपुरुषसम्बन्धि प्रजाजनसम्बन्धित्वेन चायं द्विप्रभेदः। तत्र राजकर्मणि निखिलसैन्याधिपत्यविज्ञानं, शास्त्रास्त्रविद्यां, नानाविधव्यूहसमभ्यासं, यमद्यत्वेन लोके 'कवायद' इत्याचक्षते। या हि शत्रुभिः सम्पराये क्रियाऽनुष्ठीयते, तत्सर्वं यथावत् शिक्षेरन्। प्रजानां पालनवर्धनक्रमं परिशिक्ष्य न्यायनाशेषविशः प्रसादसरणिं दुष्टचेतसां यथावद्दण्डेन साधुजनपरिरक्षणप्रकारञ्च सर्वथा शिक्षेरन्। राजविद्यामिमां वर्षचतुष्टयेन विज्ञाय गान्धर्ववेदं – गानविद्यामधीयीरन्। तत्र स्वर–राग–रागिणी–समय–ताल–ग्राम–लय–वादित्र–नृत्य–गीतादिकं यथावच्छिक्षेयुः। तत्रापि प्राधान्येन सामवेदगानं वादित्रवादनपूर्वकं शिक्षणीयं नारदसंहितादय आर्षग्रन्थाश्च वर्षचतुष्टयेन अध्येतव्याः। परं भण्डवेश्याङ्गनाधुनिकगायकानां विषयासक्तिजनकान् गर्दभशब्दानिव व्यर्थालापान् जात्वपि नानुतिष्ठेयुः। अनन्तरमर्थवेदं यं हि शिल्पविद्येति समाचक्षते – अधीयीरन्। तत्र पदार्थानां गुणविज्ञानं क्रियासु कौशलं नानाविधद्रव्याणां निर्माणपाटवं पृथिवीतो द्युपर्यन्तस्य विज्ञानम् अर्थ–ऐश्वर्यवृद्धिकरीं विद्यां वर्षचतुष्टयेन यथावच्छिक्षेरन्।

पश्चात् वर्षद्वयेन सूर्यसिद्धान्तादि ज्योतिषशास्त्रं यत्र हि बीजाङ्कगणितं भूगोलखगोलविज्ञानं, भूगर्भविद्या च वर्ण्यते यथावच्छिक्षेरन्। अनन्तरं सर्वविद्यां हस्तक्रियां यन्त्रकलाविद्याञ्च विजानीयुः। यथा ऋग्यजुः सामाथर्ववेदचतुष्टयम् ईश्वरकृतं तथैव ऐतरेय–शतपथ–साम–गोपथब्राह्मणचतुष्टयं–शिक्षा–कल्प–व्याकरण–निघण्टु–निरुक्त–छन्द–ज्योतिषप्रभृतिवेदाङ्गषटकं मीमांसादि षट्शास्त्राणि, वेदोपाङ्गश्च आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अथर्ववेदाश्च, चत्वारो वेदोपवेदाः सर्वे ह्येवार्षग्रन्थाः यथावच्छिक्षेरन्।३

In Public domain. Digitization Muthulakshmi Research Academy

ऋग्वेदादिभाष्यभूमिकायामथ पठनपाठनविषयः संक्षेपतः इत्युक्त्वा पाठ्यविषयाः के इति अदर्शयन्। तद्यथा तत्रादौ पठनस्यारम्भे शिक्षारीत्या स्थानप्रयत्नस्वरज्ञानायाक्षरोच्चारणोपदेशः कर्त्तव्यः। येन नैव स्वरवर्णोच्चारण ज्ञानविरोधः स्यात्। तद्यथा 'प' इत्यस्योच्चारणमोष्ठौ संयोज्यैव कार्यम्। अस्यौष्ठो स्थानं स्पृष्टःप्रयत्न इति वेद्यम्। एवमेव सर्वत्र।

तथा भाषणश्रवणासनगमनोत्थानभोजनाध्ययनविचारार्थयोजनादिनापि शिक्षा कर्तव्यैव। अर्थज्ञानेन सहैव पठने कृते परमोत्तमं फलं प्राप्नोति। परन्तु यो न पठति तस्मात्त्वयं पाठमात्रकार्य्यप्युत्तमो भवति। यस्तु खलु शब्दार्थसम्बन्धविज्ञानपुरस्सरमधीते स उत्तमतरः। यश्चैवं वेदान् पठित्वा विज्ञाय च शुभगुणकर्माचरणेन सर्वोपकारी भवति स उत्तमतमः।

मनुष्यैर्वेदार्थविज्ञानाय व्याकरणाष्टाध्यायीमहाभाष्याध्ययनम्। ततो निघण्टुनिरुक्तछन्दो−ज्योतिषां वेदाङ्गानाम्। ततो मीमांसावैशेषिकन्याययोगसांख्यवेदान्तानां वेदोपाङ्गानां षण्णां शास्त्राणाम्। तत ऐतरेयशतपथसामगोपथब्राह्मणानामध्ययनं च कृत्वा वेदार्थपठनं कर्तव्यम्। यद्वा एतत्सर्वमधीतवद्भिः कृतं वेदव्याख्यानं दृष्ट्वा च वेदार्थज्ञानं सर्वैः कर्तव्यमिति।४।

ये स्वतः प्रमाणभूता मन्त्रभागसंहिताख्याश्चत्वारो वेदा उक्तास्तद्भिन्नास्तद्व्याख्यानभूता ब्राह्मणग्रन्था वेदानुकूलतया प्रमाणमर्हन्ति। तथैवैकादशशतानि सप्तविंशतिश्च वेदशाखा वेदार्थव्याख्याना अपि वेदानुकूलतयैव प्रमाणमर्हन्ति। एवमेव यानि शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दोज्योतिषमिति षडङ्गानि। तथाऽऽयुर्वेदो वैद्यकशास्त्रम्, धनुर्वेदः शास्त्रास्त्रराजविद्या, गान्धर्ववेदो गानविद्या, अर्थवेदश्शिल्पशास्त्रं चत्वार उपवेदा अपि। तत्र चरकसुश्रुतनिघण्ड्वादय आयुर्वेदे ग्राह्याः।

धनुर्वेदस्य ग्रन्थाः प्रायेण लुप्ताः सन्ति। परं तु तस्य सर्वविद्याक्रियावयवैः सिद्धत्त्वादिदानीमपि साधयितुमर्हाः सन्ति। अङ्गिरोप्रभृतिभिः निर्मिता धनुर्वेदग्रन्था बहव आसन्निति। गान्धर्ववेदश्च सामगानविद्यादिसिद्धः। अर्थवेदश्च विश्वकर्मत्वष्टृ (देवज्ञ) मयकृतश्चतंसृसंहिताख्यो ग्राह्यः।

शिक्षा पाणिन्यादिमुनिकृता। कल्पो मानवकल्प सूत्रादिः। व्याकरणमष्टाध्यायीमहाभाष्य−धातुपाठोणादिगणप्रातिपदिकगणपाठाख्यम्। निरुक्तं यास्कमुनिकृतं निघण्टुसहितं चतुर्थं वेदाङ्गं मन्तव्यम्। छन्दः पिङ्गलाचार्य्यकृतसूत्रभाष्यम्। ज्योतिषं वसिष्ठाद्यृष्युक्तं रेखाबीजगणितमयं चेति वेदानां षडङ्गानि सन्ति।

तथा षडुपाङ्गानि − तत्राद्यं कर्मकाण्डविधायकं धर्मधर्मिव्याख्यामयं व्यासमुन्यादिकृत−भाष्यसहितं जैमिनिमुनिकृतसूत्रं पूर्वमीमांसाशास्त्राख्यं ग्राह्यम्। द्वितीयं विशेषतया धर्मधर्मिविधायकं प्रशस्तपादकृतभाष्यसहितं काणादमुनिकृतं वैशेषिकशास्त्रम्। तृतीयं पदार्थविद्याविधायकं वात्स्यायनभाष्यसहितं गोतममुनिकृतं न्यायशास्त्रम्। चतुर्थं यत्त्रिभिर्मीमांसावैशेषिकन्यायशास्त्रैः सर्वपदार्थानां श्रवणमननेनानुमानिकज्ञानतया निश्चयो भवति, तेषां साक्षाज्ज्ञानसाधनमुपासनाविधायकं व्यासमुनिकृतभाष्यसहितं पतञ्जलिमुनिकृतं योगशास्त्रम्। तथा पञ्चमं तत्त्वपरिगणनविवेकार्थं भागुरिमुनिकृतभाष्यसहितं कपिलमुनिकृतं सांख्यशास्त्रम्। षष्ठं बौद्धायनवृत्त्यादिव्याख्यानसहितं व्यासमुनिकृतं वेदान्तशास्त्रम्। तथैव ईशकेनकठप्रश्नमुण्डकमाण्डूक्य−तैत्तिरीयैतरेयछान्दोग्यबृहदारण्यका दशोपनिषदश्चोपाङ्गानि च ग्राह्याणि। एवं चत्वारो वेदाः सशाखा

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्यानसहिताश्चत्वार उपवेदाः, षड् वेदाङ्गानि, दर्शनानि इत्यादयः मिलित्वा चतुर्दश भवन्ति। एतैरेव चतुर्दशविद्या मनुष्यैर्ग्राह्या भवन्तीति वेद्यम्। ५

संस्कृतवाक्यप्रबोध इत्याख्ये ग्रन्थे प्रश्नोत्तरमाध्यमेन पाठ्यचर्यायाः रूपरेखाः प्रतिपादिताः। तद्यथा –

पूर्वं किं पठनीयम् ? वर्णोच्चारणशिक्षामधीध्वम्।

पश्चात् किमध्येतव्यम् ? किंचित् संस्कृतोक्तिबोधः क्रियताम्।

पुनः किमभ्यसनीयम् ? यथायोग्यव्यवहारानुष्ठाय प्रयतध्वम्।

कुतः ? अनुचितव्यवहारकर्तुर्विद्यैव न जायते।

अथकिमध्यापयिष्यते भवता ? अष्टाध्यायीमहाभाष्यम्।

किमनेन पठितेन भविष्यति ? शब्दार्थसम्बन्धविज्ञानम्।

पुनः क्रमेण किमध्येतव्यम्? शिक्षा–कल्प–निघण्टु–निरुक्त–छन्दो–ज्योतिषाणि वेदानामङ्गानि, मीमांसा–वैशेषिक–न्याय–योगसांख्य–वेदान्तान्युपाङ्गानि, आयुर्–धनुर्–गान्धर्व–अथर्वोपवेदान्, ऐतरेय–शतपथ–साम–गोपथं ब्राह्मणानधीत्य, ऋग्–यजुः–साम–अथर्ववेदान् पठत।

एतत् सर्वं विदित्वा किं कार्यम् ? धर्मजिज्ञासाऽनुष्ठाने एतेषामेवाध्यापनं च।६ इति।

विज्ञानपत्रेऽपि स्वामिदयानन्दोक्त–पाठ्यचर्यायाः रूपरेखाः समाकलिताः। तदत्र संक्षेपेण विव्रियते।

श्रीरस्तु।।१. ऋग्वेदः, २. यजुर्वेदः, ३. सामवेदः, ४. अथर्ववेदः एतेषु चतुर्षु वेदेषु कर्मोपासनाज्ञान – काण्डानां निश्चयोऽस्ति। यमादिः समाध्यन्तः उपासनाकाण्डश्च बोद्धव्यः। निष्कर्मादिः परब्रह्मसाक्षात्कारान्तो ज्ञानकाण्डो ज्ञातव्यः।। आयुर्वेदः ५, तत्र चिकित्साविद्यास्ति।। तत्र चरकसुश्रुतौ द्वौ ग्रन्थौ सत्यौ विज्ञातव्यौ।। धनुर्वेदः ६, तत्र शास्त्रास्त्रविद्यास्ति। गान्धर्ववेदः ७, तत्र गानविद्यास्ति।। ८. अथर्ववेदः तत्र शिल्पविद्यास्ति। एते चत्वारो वेदानामुपवेदा यथासंख्यं वेदितव्याः।। ९. शिक्षा वेदस्था, तत्र वर्णोच्चारणविधिरस्ति।। १०. कल्पः तत्र वेदमन्त्राणामनुष्ठानविधिरस्ति।। ११. व्याकरणम्, तत्र शब्दार्थसम्बन्धानां निश्चयोऽस्ति।। तत्र द्वौ ग्रन्थावष्टाध्यायीव्याकरणमहाभाष्याख्यौ सत्यौ वेदितव्यौ।। १२. निरुक्तम् तत्र वेदमन्त्राणां निरुक्तयः सन्ति।। १३. छन्दः तत्र गायत्र्यादिछन्दसां लक्षणानि सन्ति।। १४. ज्योतिषम्, तत्र भूतभविष्यद्वर्तमानानां ज्ञानमस्ति।। इमाश्चतुर्दशविद्या अध्याप्याध्येयानि। ईश– केन– कठ– प्रश्न– मुण्डक– माण्डूक्य – तैत्तिरीय – ऐतरेय– छान्दोग्य– बृहदारण्य – श्वेताश्वतर– कैवल्योपनिषदो द्वादश १५, अत्र ब्रह्मविद्यैवास्ति।। १६. शारीरकसूत्राणि, तत्रोपनिषन्मन्त्राणां व्याख्यानमस्ति।। १७. कात्यायनादीनि सूत्राणि, तत्र निषेकादिश्मशानान्तानां संस्काराणां व्याख्यानमस्ति।। १८. योगशास्त्रम् तत्रोपासनाया ज्ञानस्य च साधनानि सन्ति।। १९. वाकोवाक्यमेको ग्रन्थः तत्र वेदानुकूला तर्कविद्यास्ति।। २०. मनुस्मृतिः, तत्र वर्णाश्रमधर्माणां व्याख्यानमस्ति, वर्णसंस्कारधर्माणाञ्च।। २१. महाभारतम, तत्र शिष्टानां जनानां लक्षणानि सन्ति, दुष्टानां जनानाञ्च।। एतान्येकविंशतिः शास्त्राणि सत्यानि वेदितव्यानि अध्यायाध्ययानि चेति स्वामिचरणानामाशयः।।७

एवञ्च पूर्वं विस्तृतरूपेणार्षग्रन्थानां पठनपाठनविषयाः के सन्तीति प्रतिपाद्य साम्प्रतं परिहेयग्रन्थाः के

In Public domain. Digitization Muthulakshmi Research Academy

सन्तीति संक्षेपतः परिगण्यते। तथाहि_ व्याकरणे कातन्त्र –सारस्वत – चन्द्रिका – मुग्धबोध – कौमुदि – शेखर– मनोरमादयो ग्रन्थाः। कोशेष्वमरकोशादयः। छन्दोग्रन्थेषु वृत्तरत्नाकरादयः। शिक्षायां ″अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा– इत्यादि शब्दारब्धो ग्रन्थः। ज्योतिषशास्त्रे शीघ्रबोधमुहूर्तचिन्तामणिप्रभृतयः। काव्येषु नायिकाभेदाः कुवलयानन्दरघुवंश– माघ–किरातार्जुनीयादिग्रन्थाश्च। मीमांसाया धर्मसिन्धुव्रतार्कादयः। वैशेषिकतर्कसंग्रहादयः। न्यायशास्त्रे जागदीशीप्रमुखाः, योगशास्त्रे हठप्रदीपिकादयः। सांख्ये सांख्यत्तत्त्वकौमुद्यादयः, वेदान्ते योगवासिष्ठपञ्चदश्यादयः। आयुर्वेदे शार्ङ्गधरादयः स्मृतिषु मनुस्मृतेः प्रक्षिप्तश्लोकाः सर्वाश्चान्याः स्मृतयः, सकलतन्त्रग्रन्थाः सर्वपुराणोपपुराणानि, तुलसीदासप्रणीतं भाषारामायणम्, रुक्मिणीमङ्गलादिकम्, कृत्स्नभाषाग्रन्थाश्च दूरतस्त्याज्यमिति। यद्यपि एषु ग्रन्थेषु सत्यप्यल्पीयसि सत्येऽसत्यबहुलत्वादिमे विषसम्पृक्तान्नवत् त्याज्याः इति स्वामिपादानामाशयः। ८

स्वामिपादाः ऋग्वेदादिभाष्यभूमिकायां के परिहेयग्रन्थाः सन्तीति ग्रन्थप्रामाण्यविषयविचारप्रसङ्गे अवोचन्। तथाहि – एतासां पठनाद्यथार्थविदितत्वान्मानसबाह्यज्ञानक्रियाकाण्ड–साक्षात्करणाच्च महाविद्वान् भवतीति निश्चेतव्यम्। एत ईश्वरोक्त वेदास्तद्व्याख्यानमया ब्राह्मणादयो ग्रन्था आर्षा वेदानुकूलाः सत्यधर्मविद्यायुक्ता युक्तिप्रमाणसिद्धा एव माननीयाः सन्ति। नैवैतेभ्यो भिन्नाः पक्षपातक्षुद्रविचारस्वल्पविद्याऽधर्माचरणप्रतिपादना अनाप्तोक्ताः वेदार्थविरुद्धा युक्तिप्रमाणविरहा ग्रन्थाः केनापि कदाचिद् अङ्गीकार्य्या इति।

ते च सङ्क्षेपतः परिगण्यन्ते – रुद्रायामलादयस्तन्त्रग्रन्थाः। ब्रह्मवैवर्त्तादीनि पुराणान्युपपुराणानि च। प्रक्षिप्तश्लोकत्यागाय मनुस्मृतेर्व्यतिरिक्ताः स्मृतयः। सारस्वतचन्द्रिकाकौमुद्यादयो व्याकरणाभासग्रन्थाः मीमांसाशास्त्रादिविरुद्धनिर्णयसिन्ध्वादयो ग्रन्थाः। वैशेषिकन्यायशास्त्रादि–विरुद्धास्तर्कसंग्रहमारभ्य जागदीश्यन्ता न्यायाभासा ग्रन्थाः। योगशास्त्रादिविरुद्धा हठप्रदीपिकादयो ग्रन्थाः सशास्त्रविरुद्धा सांख्यतत्वकौमुद्यादयः। वेदान्तशास्त्रविरुद्धा वेदान्तसारपञ्चदशीयोगवासिष्ठादयो ग्रन्थाः ज्योतिषशास्त्रविरुद्धा मुहूर्तचिन्तामण्यादयो मुहूर्त्तजन्मपत्रफलादेशविधायका ग्रन्थाः।

तथैव श्रोतसूत्रविरुद्धास्त्रिकण्डिकास्नानसूत्रपरिशिष्टादयो ग्रन्थाः। मार्गशीर्षैकादशीकाशीस्थल–जलसेवनयात्राकरणदर्शननामस्मरणस्नानजडमूर्तिपूजाकरणमात्रेणैव मुक्तिभावनपापनिवारणमाहात्म्य–विधायकाः सर्वे ग्रन्थाः। तथैव पाखण्डिसम्प्रदायि निर्मितानि सर्वाणि पुस्तकानि च, नास्तिकत्वविधायका ग्रन्थाश्चोपदेशाश्च। ते सर्वे वेदादिशास्त्रविरुद्धा युक्तिप्रमाणपरीक्षहीनाः सन्त्यतः शिष्टैरग्राह्या भवन्ति इति। ९. इत्थं पाठ्यचर्यायाः रूपरेखाः संक्षेपतो प्रतिपादिताः।

सन्दर्भाः

1. सत्यार्थप्रकाशः तृतीयसमुल्लासः, पृष्ठः–49-60
2. सत्यार्थप्रकाशः तृतीयसमुल्लासः, पृष्ठः– 62
3. सत्यार्थप्रकाशः तृतीयसमुल्लासः, पृष्ठः– 64
4. ऋग्वेदादिभाष्यभूमिका, पृष्ठः– 585-587

In Public domain. Digitization Muthulakshmi Research Academy

5. ऋग्वेदादिभाष्यभूमिका, पृष्ठः- 540-542
6. संस्कृतवाक्यप्रबोधः, पृष्ठः– 2-3
7. ऋषि दयानन्द के पत्र और विज्ञापन, पृष्ठः– 27-कानपुर प्रकाशन्
8. सत्यार्थप्रकाशः तृतीयसमुल्लासः, पृष्ठः- 65
9. ऋग्वेदादिभाष्यभूमिका, पृष्ठः– ट्ट– 589

****

In Public domain. Digitization Muthulakshmi Research Academy

महर्षिदयानन्दस्वामिनां भारतीयं भव्यमैतिह्यम्

डा. विद्यानन्दार्यः

अष्टादशशताब्द्याः मध्यभागे बंगालप्रान्ते आङ्ग्लीयानां शासनमभवत्। शनैः शनैः सम्पूर्ण भारतवर्षमाङ्ग्लीयानामधीने सञ्जातम्। बहुकालं यावत् भारतमाङ्ग्लीयानामधीने स्थितम् परं सांस्कृतिकदृष्ट्या कालस्यास्य असाधारणं महत्वं विद्यते। आङ्ग्लीयानाम् अधीने स्थितमपि भारतं नवीनस्थितीनां कारणेन शताब्दीनां कुम्भकर्णनिद्रां विहाय धार्मिकराजनैतिकसामाजिकबौद्धिक-वैज्ञानिकार्थिकक्षेत्रेषु महतीमुन्नतिं कृतवत्। इतिहासज्ञैरयमेव नवजागरणस्य कालः इति उच्यते। समयेऽस्मिन् अनेके महापुरुषाः इह भारते लब्धजन्मानः भारतावनिं सर्वविधक्षेत्रेषु गौरवान्वितामकुर्वन्। भारतावनिं गौरवान्वितां कृतवत्सु महापुरुषेषु महर्षिदयानन्दस्वामिनां महद्विशिष्टं स्थानं विद्यते। पराधीनासु स्थितिषु सतीष्वपि महर्षिदयानन्दस्वामिभिर्भारतीयं भव्यमैतिह्यं यथा प्रखरतया प्रस्तुतं न तथा केनाप्यन्येन महापुरुषेण।

महर्षिदयानन्दस्वामिनामिदं मन्तव्यं यत् प्राचीनकाले आर्यावर्तदेशस्य उत भारतवर्षस्य निवासिनः आर्याः अत्यधिकमुन्नताः अभवन्। सर्वत्र तेषां सार्वभौमं शासनमवर्तत। इतरदेशस्थानां राज्ञां स्थितिः आर्यशासकाधीनमाण्डलिकरूपा आसीत्। मानवसृष्टेः आरम्भात् पञ्चसहस्रवर्षेभ्यः पूर्वं यावत् आर्याणां सार्वभौमचक्रवर्तिराज्यमवर्तत। आर्याणां धर्मस्य अन्यदेशेष्वपि प्रसारः अभवत्। निखिलमानवसमाजश्च आर्यावर्तदेशस्थविद्वद्भ्यः आचार्येभ्यश्च धर्मस्य सदाचारस्य ज्ञानविज्ञानस्य च शिक्षां गृह्णाति स्म। विषयमिममेवं प्रस्तुवन्ति दयानन्दस्वामिनः - ईदृशोऽयमार्यावर्तदेशोऽस्ति यदस्मिन्महीमण्डले नान्यः कोऽपि देशस्तत्सदृशः। अत एवेयं भूमिः सुवर्णभूमिरभिधीयते। यावन्तो देशा भूवलये सन्ति सकलास्त एनमेव देशं प्रशंसन्ति आशासते चास्य देशस्य संस्कृत्या एवास्माकं कल्याणं भविष्यति। स्पर्शमणिप्रस्तर इति यदाकर्ण्यते तत्वनूतं परमार्यावर्तदेश एव सत्यः स्पर्शमणिर्वर्तते यदस्य स्पर्शसमकालमेवायसरूपा दरिद्रा विदेशाः सुवर्णमया अर्थात्सम्पत्तिशालिनः सञ्जायन्त इति।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। (मनु०-२-२०)

आसृष्टेरापञ्चसहस्रवर्षपूर्वसमयमार्याणां सार्वभौमं चक्रवर्तिपदमण्डितमवनिमण्डले विरराज साम्राज्यम्। अन्येषु देशेषु माण्डलिका अर्थात् सामन्ता महीपतयो न्यवसन्। यतः कौरवपाण्डवपर्यन्तमत्रत्ये राज्ये राजशासने चाखिलमहीवलयवर्तिनो निखिला राजानः प्रजाश्चानुववृतिरे। यतोऽत्र सृष्ट्यारम्भसृष्टाया मनुस्मृतेरस्या प्रमाणमिदम्। "अस्मिन्नेवार्यावर्तदेशे समुत्पन्नेभ्यो ब्राह्मणेभ्यो विद्वज्जनेभ्यो भूमण्डलगता मानवा ब्राह्मणक्षत्रियवैश्यशूद्रदस्युम्लेच्छादयः सकलाः स्वस्वयोग्यं चरित्रं विद्याश्च शिक्षेरन्निति"। महाराजयुधिष्ठिरकृतराजसूययज्ञं महाभारतयुद्धञ्च यावदत्रत्यराष्ट्राधीनानि बभूवुरखिलराज्यानि। श्रूयताम् - चीनदेशीयो भगदत्तः पातालवासी बभ्रूवाहनो हरिवर्षीयो मार्जारलोचनो विडलाक्षो यूनान इत्यभिहितो यवन ईराणवास्तव्यः शल्यश्चेत्यादयोऽखिल-नृपतयो राजसूययज्ञे महाभारतयुद्धे च निदेशानुसारमाजग्मुः (१) इति।

अत्रेदमवधेयम् - आर्याणां चक्रवर्तिशासनमासीदिति स्वामिदयानन्दवर्याणां कथनस्यायमभिप्रायो नास्ति

In Public domain. Digitization Muthulakshmi Research Academy

यत् सम्पूर्णपृथिव्यामेकमेव राज्यमासीदिति। कथनस्यायमेवाभिप्रायः यत् आर्यावर्तात् पृथक् अन्यानि बहूनि राज्यानि तदा आसन् किन्तु तानि राज्यानि पूर्णप्रभुत्वसम्पन्नाः न भूत्वा आर्यावर्तस्य चक्रवर्तिसार्वभौमसम्राजस्याधीनतायामवर्तन्त। महाभारतसमये पाण्डवयुधिष्ठिरोऽपि चक्रवर्तिसम्राट् आसीत्। चीन–यूरोप–यूनानप्रभृतिराज्यानां राजानः तस्याधीनतामङ्गीकुर्वन्ति स्मेति ते सर्वे युधिष्ठिरस्य राजसूये यज्ञे सम्मिलिताः अभूवन्।

आर्यावर्त इति कथनेन स्वामिनामनुसारं सम्पूर्णभारतवर्षस्य ग्रहणं भवति। आर्यावर्तसम्बद्धमहर्षिमनोः श्लोकयोः या व्याख्या कृता तेनैतदेव ज्ञायते –

आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः।।

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशमार्यावर्तं प्रचक्षते।। (मनु० २–२२, १७)

उत्तरस्यां दिशि हिमवान्, दक्षिणस्यां विन्ध्याचलः, पूर्वपश्चिमयोस्सागरः। किञ्च पश्चिमस्यां दिशि उदीचीनपर्वतेभ्यः समुद्गत्य प्रवहन्ती दक्षिणसागरस्योपसागरे सम्मिलिता सरस्वती सिन्धुर्वाहिनी, पूर्वस्यां नयपालजनपदस्य प्राचीनपर्वतेभ्यः समुद्भूय बङ्गानां पूर्वेण पश्चिमेन च ब्रह्मदेशस्य प्रवहन्ती दक्षिणसागरसङ्गता दृषद्वती (या सम्प्रतं ब्रह्मपुत्रेत्युच्यते) सीमायमाना तिष्ठति। हिमवद्विन्ध्यपर्वतयोरन्तर्गताः दाक्षिणात्याः पार्वता रामैश्वरपर्यन्ताः सर्व एव जनपदा देवैरार्यैर्विद्वद्भिर्वासितत्वात्, तेषामेव च निवासभूमितया आर्यावर्तशब्देनाभिधीयन्ते **(२)** इति।

आर्याः के? किं विदेशेभ्यः ते आगताः वा, यथा हि ब्रुवते बहवः? इति प्रश्ने स्वामिनः विदेशात् भारतं प्रति आर्याणामागमनस्य वादः मिथ्येति वदन्तः ऋग्वेदाथर्ववेदयोः मन्त्रखण्डयोः प्रमाणपुरस्सरमुत्तरन्त्येवम् **विजानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्।**(ऋग्०-१-५१-८) **उत शूद्रे उतार्ये** (अथर्व०–१९–६२) धार्मिकाणां विदुषामाप्तपुरुषाणां "आर्यः" इति ततो भिन्नानाञ्च दस्युर्मलिम्लुचो दुष्टोऽधार्मिकोऽविद्वांश्चेति नामधेयानि, तथा ब्राह्मणक्षत्रियवैश्यानां द्विजसंज्ञकानामार्य इति शूद्राणाञ्चानार्य इति नामधेयमस्तीति पूर्वमेवालिखाम। वेदेन खल्वेवमभिधीयमाने वैदेशिकानां मिथ्याकल्पनाप्रसूतं को हि नाम शक्नोति सम्मन्तुं धीमान्नरः। ' ईरानतः समागतैरार्यैरत्रत्यान् वन्यप्राणिन् विजित्य निष्कास्य च भारतमधिगतमिति ' न क्वापि संस्कृतग्रन्थे इतिहासे वा क्वचित् प्रतिपाद्यते। कथं पुनर्वैदेशिकानां लेखो मान्यतामर्हति **(३)** इति।

महर्षिदयानन्दस्वामिनामनुसारं प्राचीनकाले आर्याः न केवलं राजनैतिकदृष्ट्या विश्वस्य अग्रगामिनः आसन् अपितु ज्ञानविज्ञानकलाधर्मसंस्कृतिसम्बद्धक्षेत्रेष्वपि समेषां शिरोमणित्वेन अर्वतन्त। प्राचीनभारतीयास्त्रशस्त्रविज्ञानस्य बुद्धिगम्यं रूपं प्रदर्शयता महर्षिणा भारतात् एव विद्याधर्मप्रभृतीनां ज्ञानं अन्यदेशान् प्रति प्रसृतमिति प्रकरणमुपस्थापितम् --' मन्त्रेण ' अर्थात् विचारेण सकलसृष्टिगतपदार्थानां प्रथमं ज्ञानं सम्पद्यते पश्चात् क्रियया नैकविधाः पदार्थाः क्रियाकौशलानि चोत्पद्यन्ते। यथा कश्चन लोहमयं बाणं गोलं वा निर्माय तत्रेदृशान् पदार्थान् निदध्यात् यद्यऽनलसंयोजिता वायुमण्डले धूमप्रसारणेन रविकिरणानां वायोर्वा सम्पर्केण चाग्नि

In Public domain. Digitization Muthulakshmi Research Academy

प्रकटयेयुस्तदेवाऽऽग्नेयास्त्रमभिधीयते। यदाऽन्यो जन एतन्निवारयितुमभिलषेत्तदा स एतस्योपरि वारुणास्त्रं परिमुञ्चेत्, अर्थाद् यथा प्रत्यर्थी रिपोर्बले परिमुच्याग्नेयास्त्रं तन्निहन्तुं वाञ्छेत् तथैव निजसैन्यसंरक्षणाय सेनापतिर्वारुणास्त्रेण परस्याग्नेयास्त्रं निवारयेत्। तदेदृशां द्रव्याणां संयोगात् निष्पद्यते येषां धूमपटली वायुस्पर्शसमकालमेव मेघमण्डली सम्भूय झटिति वर्षेदनलञ्च निर्वापयेत्। इत्थमेव नागपाशो यो रिपुबले प्रक्षेपणेन तद्गात्राणि दृढं बध्नाति। तथैव मोहनास्त्रमन्यद् यस्मिन् मादकद्रव्यनिक्षेपणात्तदीयधूमसंसर्गात् निखिलमरिबलं निद्राकुलं विचेतनं वा सम्पद्येत। अनेनैव प्रकारेण सकलानि शस्त्रास्त्राणि समजायन्त। लोहतन्तोः काचाद्वाऽन्यस्मात्कस्माच्चित्पदार्थाद्वा विद्युतमुत्पाद्य रिपुदलं व्यापादयन् येन तदप्याग्नेयास्त्रं पाशुपतास्त्रञ्चाख्यायते। ---यावत्यो विद्या भूमण्डले प्रसृतास्तावत्यः सकला आर्यावर्तदेशान्मिश्रदेशे तस्माद् यूनानदेशे तयो रोमदेशे तस्माद् यूरोपदेशे यूरोपाच्चामेरीकादिदेशेषु प्रसृतास्सन्ति (४) इति।

एवंविधमेव भावं अन्यदेशस्थविदुषः अन्यमतावलम्बिनश्च मते उपस्थाप्य निगदन्ति- निश्चितमिदं खलु 'यावत्यो विद्या यावन्ति च मतानि महीतले विततानि तानि निखिलान्यार्यावर्तदेशादेव प्रचलितानीति'। दृश्यताम्- कश्चित् फ्रान्सदेशान्तर्गतपैरसनगरनिवासी जैयकायटाभिधमहोदयः स्वीये 'बायबिल इन इण्डिया' नामके ग्रन्थे लिखति- ' सर्वासां विद्यानां सौजन्यानां कल्याणानां वा निधिरयमार्यावर्तदेशो वर्तते। सकला विद्या मतानि चैतस्माद् देशात् प्रचलितानि सन्तीति।' परमात्मानञ्चासौ प्रार्थयते'। अयि परमेश्वर यादृशी पुराऽऽर्यावर्तदेशस्य समुन्नतिरासीत्तादृश्येवास्मद्देशस्य समुन्नतिर्विधीयतां भगवानिति। तत्तस्मिन् ग्रन्थेऽवलोकनीयम्। तथैव दाराशिकोहाख्ययवनराजपुत्रोऽपि खल्वित्थमेव निरचैषीद्- अर्बीप्रमुखा विविधा भाषा अहमपठं किन्तु मनसो मे सन्देहो दूरीभूयाऽऽनन्दो नाभवत्। यदा खलु संस्कृतमवालोकयमाकर्णयञ्च तदा निस्सन्देहीभूय भूयानाऽऽनन्दो मेऽभून्मनसीति' (५) इति।

महर्षिणा बहूनामेवंविधराज्ञां नामानि प्रदत्तानि ये चक्रवर्तिसार्वभौमशासका आसन् मैत्र्युपनिषदश्च उदाहरणेन लिखितम् - अथ किमेतैर्वा परेऽन्ये महाधनुर्धराश्चक्रवर्तिनः केचित् सुद्युम्नभूरि-द्युम्नेन्द्रद्युम्नकुवलयाश्वयौवनाश्ववद्ध्र्यश्वाश्वपतिशशविन्दुहरिश्चन्द्राऽम्बरीषननक्तुशर्यातिययात्यनरण्याक्षसेनादयः। अथ मरुत्तभरतप्रभृतयो राजानः (- मैत्र्युपनिषद्-प्र०१, खं०४)। इत्यादिप्रमाणैः सिद्धं यत्सृष्टित आरभ्य महाभारतयुद्धपर्यन्तमार्यकुलेष्वेव चक्रवर्तिनः सार्वभौमा नरपतयो बभूवुः।

----- यथाऽत्र सुद्युम्नप्रभृतीनां सर्वभूमिविश्रुतानां सार्वभौमानां चक्रवर्तिनृपाणां नामानि लिखितानि सन्ति तथैव मनुस्मृतिमहाभारतादिग्रन्थेष्वपि स्वायम्भुवादिचक्रवर्तिनरेन्द्राणां नामधेयानि स्पष्टमुल्लिखितानि वर्तन्ते। एतानि मिथ्या सन्तीति कथनमज्ञानिनां पक्षपातिनाञ्च कार्यं वर्तते (६) इति।

सृष्टेः आरभ्य पञ्चसहस्रवर्षपूर्वं यावत् आर्याणां सार्वभौमचक्रवर्तिराज्यमासीदिति महर्षिदयानन्दानामिदं यत् मतं तस्याङ्गीकारे आधुनिकेतिहासज्ञानां सङ्कोचः भवेत् परं विश्वस्य प्राचीनेतिहासविषये आधुनिकविदुषां याः धारणाः विद्यन्ते तासु निरन्तरं परिवर्तनं भवतीति निश्चप्रचम्। पुरातत्वसम्बन्धिशोधद्वारा नित्यं नूतनानि तथ्यानि प्रकाशमायान्ति, नृतत्वशास्त्रसदृशविज्ञानानां प्रगत्या पुरातनाः धारणाः परिवर्तिताः जायन्ते। एवंविधविषयाः

In Public domain. Digitization Muthulakshmi Research Academy

महर्षिदयानन्दस्वामिनां मन्तव्यस्य सत्यतां प्रति सङ्केतरूपा एवेति बोद्धुं नासुकरम्।

यस्य कस्यापि कारणेन भारतीयभव्यतायाः हानिर्जायमानानुभूता महर्षिदयानन्दैः, तं विरुद्ध्य महत्या कठोरतया लिखितम्। यथा हि जर्मनदेशदेशवास्तव्यस्य मोक्षमूलरस्य विषये दृश्यते – 'शार्मण्यदेशे संस्कृतविद्यायाः प्रचुरः प्रचारः। यावच्च संस्कृतं मोक्षमूलरमहोदयोऽपठत्तावन्न कोऽप्यपठदिति' ये जना वदन्ति तेषां कथनमेव केवलमिदम्। यथा 'निरस्तपादपे देशे एरण्डोऽपि द्रुमायते' अर्थात् यत्र देशे कोऽपि महीरुहो न प्ररोहति तत्रैरण्डमेव महावृक्षं मन्यन्ते जनाः। तथैव यूरोपदेशे संस्कृतविद्यायाः प्रचाराभावात् शार्मण्यदेशीयैर्जनैर्मोक्षमूलरमहाशयेन च यत्किञ्चिदधीतं तदेव तद्देशकृतेऽधिकमस्ति। परमार्यावर्तदेशमभिलक्ष्य तु तेषामतिन्यूना विद्यते गणना। यतो मया शार्मण्यदेशवासिन आचार्यस्य पत्रेण' शार्मण्यदेशे संस्कृतपत्रिकाया अर्थावगन्तारोऽपि जना अतिन्यूनास्सन्तीति' व्यज्ञायि। मोक्षमूलरमहोदयस्य संस्कृतसाहित्यमल्पीयसीं वेदव्याख्याञ्चावलोक्य मयाऽवेदि मोक्षमूलरेणेतस्ततः आर्यावर्तीयजनकृतविवृतिं विलोक्य किञ्चित् यथा तथाऽलेखि' इति। यथा–युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि। इति मन्त्रेऽश्वो वर्णितस्तेन। अस्मात्तु सायणाचार्येण यः सूर्योऽर्थो वर्णितस्स समीचीनः परमस्य सत्योऽर्थः परमात्मा विद्यते। ––––––एतावतैव 'शार्मण्यदेशे मोक्षमूलरमहोदये च संस्कृतविद्यायाः कियत्पाण्डित्यमस्तीति विज्ञेयम् (७) इति।

अन्यत्र ब्राह्मसमाजप्रार्थनासमाजयोः सम्बन्धे चर्चां कुर्वन्तः तत्सदस्यानां भारतीयपद्धतीः विरुद्ध्य क्रियमाणानाचरणान् प्रति निगदन्त्येवम् – दूरमास्तां तावन्निजदेशस्य निजपूर्वजानां वा प्रशंसाविधानं प्रत्युत तदीयस्थाने मुक्तकण्ठं निन्दन्ति तानमी। व्याख्यानेषु कृश्चीनादिकाङ्ग्ल–जनानाकण्ठपूर्णोदरं प्रशंसन्ति। ब्रह्मादिमर्हषीणां नामान्यपि न गृह्णन्ति प्रत्युत–' विनाऽङ्ग्लजनानाद्यावधि सृष्टितले कोऽपि विद्वान्नाजायत। आर्यावर्तीयजनाः सनातनसमयान्मूर्खा एव सन्ति। एषामभ्युदयः कदापि नाभूदिति' वदन्त्यमी। वेदादीनां प्रतिष्ठा तु विदूरे तिष्ठतु परं तेषां निन्दनादपि न पृथग् भवन्ति।––––अये! यदा नु खलु समुत्पन्ना इम आर्यावर्तेऽस्यैव देशस्यान्नजलाशन–पानमकार्षुरद्यापि विदधति च तदा स्वमातृपितृपितामहादिमार्गं विहायान्य–विदेशीयमत एषां भूयसाऽऽवर्जनं ब्राह्मसमाजप्रार्थनासमाजावलम्बिनामेतद्देशस्थसंस्कृतविद्या–विहीनानामपि स्वेषां विद्वत्त्वप्रकाशनमाङ्ग्लभाषामधीत्य पण्डिताभिमानिनः संवृत्य झटिति चैकमतप्रवर्तने प्रवर्तनमित्यादिकार्यं कथङ्कारं स्थिरं वृद्धिकारकञ्च भवितुं शक्यते ? (८) इति।

इत्थमेव दयानन्दस्वामिभिः तेषां जनानां कथनम् उन्मत्ततापूर्णमिति प्रोक्तं ये जनाः 'आर्याः सेनाव्यायामं न जानन्ति स्म' इति ब्रुवते। प्रमाणपुरस्सरं च प्रतिपादितं यत् आर्याः आङ्ग्लजनेभ्योऽपि कुशलाः अवर्तन्त विषयेऽस्मिन् – आर्याः सेनाव्यायामं न जानन्ति स्मेति बहवः आङ्ग्लभाषां पठितवन्तः जनाः भाषन्ते परमेतत् कथनमुन्मत्ततापूर्णमेव। यतो हि मकरव्यूह–बलाकाव्यूह–सूचीव्यूह–शूकरव्यूह–शकटव्यूह–चक्रव्यूहप्रभृतयो विविधाः सेनाव्यायामाः आर्यैः ज्ञायन्ते स्म। सेनायामपि विभिन्नसमूहेषु दशेश–शतेश–सहस्रेशादयोऽधिकारिणो भवन्ति स्म। तदानीन्तने समये शक्ति–असि–शतघ्नी–भुशुण्डीप्रभृतीन्यायुधान्यविद्यन्त। आङ्ग्लीयेषु

In Public domain. Digitization Muthulakshmi Research Academy

अधुनापर्यन्तमपि व्यूहः कथं रचनीय इत्यस्य ज्ञानं नास्ति। ते स्वल्पं सेनाव्यायामं कुर्वन्ति तेनैव प्राचीनार्येभ्यः ते कुशलाः सन्तीति युष्माभिरनुभूयते। निरस्तपादपे देशे एरण्डोऽपि द्रुमायते। इति कथनं सत्यमेव (९) इति।

महद्द्रव्यैतिह्ययुतं भारतं कथं साम्प्रतं शक्तिहीनं तेजोहीनं दारिद्र्ययुतं समभवत्? कथं वा सार्वभौमचक्रवर्तिराज्यं लघुषु राज्येषु विभक्तम्? इत्यस्यापि विवेचनं महर्षिदयानन्दस्वामिभिर्विहितम्– स्वायम्भुवनृपतिमारभ्य पाण्डवपर्यन्तमार्याणां चक्रवर्तिराज्यमवर्तत। तदनु मिथो विरोधेनैव विगृह्य व्यनश्यन्। यतोऽस्यां परमात्मसृष्टौ दर्पशालिनामन्यायकारिणामविदुषां जनानां शासनं न चिरं तिष्ठति। संसारस्येयं स्वाभाविकी प्रवृत्तिर्यद् यदा विपुलधनमसंख्यप्रयोजनाधिकं भवति तदाऽऽलस्यपुरुषार्थराहित्येर्ष्याद्वेषविषयासक्तिप्रमादा वर्धन्ते येन देशे सुशिक्षणं विनश्य दुर्गुणा दुर्व्यसनानि च समेधन्ते। यथा खलु मद्यमांससेवनबाल्यकालीनविवाहस्वेच्छाचारादिदोषा बहुलीभवन्ति। यदा च युद्धविभागे युद्धविद्याकौशलं बलञ्चैतावत् प्रबलं भवेद् यदमुष्य साम्मुख्यं विधातुं धरणितले नान्यः कोऽपि प्रभवेत्तदा तेषु पक्षपाताभिमानवर्द्धनेन वर्धते खल्वन्यायः। यदिमे दोषाः सञ्जायन्ते तदाऽन्योन्यस्मिन् विरोधः संवृत्येतरनीचकुलात्तदधिकः कश्चिदीदृशः समर्थपुरुषः उत्तिष्ठते यस्तेषां पराजयं कर्तुं पारयति। यथा हि खलु यवनाधिपसाम्राज्यविरुद्धं शिवराजगोविन्दसिंहौ प्रत्युत्थाय यवनानां राज्यं विदलयाञ्चक्रतुः (१०) इति।

महर्षेरनुसारं एतैरेव कारणैः कथितप्रक्रियाद्वारा आर्याणां शक्तेर्ह्रासः समभवत्। महाभारतयुद्धात् पूर्वमेव आर्येषु दोषाणामवगुणानां वा प्रादुर्भावः प्रारब्धः आसीत्, येषामुल्लेखः उद्धृतोद्धरणे कृतः। एतैरेव कारणैः महाभारतयुद्धं सञ्जातम्। उच्यते स्वामिभिः -----*परमेतादृशाः शिरोमणिरूपो देशो महाभारतयुद्धेनैतावदहन्यत यदद्यावध्यपि निजां पूर्वदशां न प्रपद्यते , यदा हि भ्राता भ्रातरं हन्तात्तदा को नु खलु सन्देहो विनाशे ? ------ यदा महान्तो विद्वांसो राजानो महाराजा ऋषयो महर्षयश्च महाभारतसंग्रामे भूयांसोऽहन्यन्त बाहुल्येन चाम्रियन्त खलु तदा विद्याया वेदोदितधर्मस्य च प्रचारो नष्टोऽभवत्। ईर्ष्याद्वेषाभिमाना अन्योऽन्यं प्रति प्रवृत्ताः। यः प्रबलो भूतस्स देशमाक्रम्य नृपतिः सञ्जातः (११) इति।

सर्वस्याः धरायाः सर्वविधोन्नत्यै सर्वे मानवाः आर्याः–श्रेष्ठाः भूत्वा संघटिताः भवन्त्विति महर्षिदयानन्दस्वामिनां चरमं लक्ष्यमवर्तत। तेषामभिमतमासीत् महत्वपूर्णमेतत्कार्यम् आर्यावर्तेन– भारतेन एव सम्भवम् । अयमेव संसारस्य सर्वश्रेष्ठो देशः। प्राचीनसमये महत्कालं यावत् भारतस्य निवासिनः धार्मिकराजनैतिक–सांस्कृतिक–क्षेत्रेषु अखिलविश्वस्य नेतृत्वमकुर्वन् यतस्ते श्रेष्ठाः अविद्यन्त, तेषां सामाजिकं जीवनम् आदर्शपूर्णमराजत, ते वेदप्रतिपादितसदाचरणनियमान् सततमपालयन्। पुनरेकवारम् आर्यावर्तीयाः भारतीयाः निखिलधरण्याः नेतृत्वं विदध्युः। एतत्तदैव सम्भवं यदा वास्तविकरूपेण भारतीयाः आर्याः भवेयुः।

In Public domain. Digitization Muthulakshmi Research Academy

सन्दर्भसूची—

1. सत्यार्थप्रकाशः, एकादशसमुल्लासः
2. सत्यार्थप्रकाशः, अष्टमसमुल्लासः
3. सत्यार्थप्रकाशः, अष्टमसमुल्लासः
4. सत्यार्थप्रकाशः, एकादशसमुल्लासः
5. सत्यार्थप्रकाशः, एकादशसमुल्लासः
6. सत्यार्थप्रकाशः, एकादशसमुल्लासः
7. सत्यार्थप्रकाशः, एकादशसमुल्लासः
8. सत्यार्थप्रकाशः, एकादशसमुल्लासः
9. पूनाप्रवचनम् ९ (इतिहासविषयकम्)
10. सत्यार्थप्रकाशः, एकादशसमुल्लासः
11. सत्यार्थप्रकाशः, एकादशसमुल्लासः
12. सत्यार्थप्रकाशः, एकादशसमुल्लासः

आधारग्रन्थसूची—

1. महर्षिदयानन्दसरस्वतिरचितसत्यार्थप्रकाशः प्रकाशकः—आर्ष साहित्य प्रचार ट्रस्ट, ४५५, खारी बावली, दिल्ली—६

2. महर्षिदयानन्दसरस्वतिरचितसत्यार्थप्रकाशः (संस्कृतानुवादः) पण्डितशंकरदेवपाठकेन देवगिरालंकृतः प्रकाशिका—सार्वदेशिका—आर्यप्रतिनिधिसभा महर्षिदयानन्दभवन, रामलीलाशाद्वलः, नयी—दिल्ली—

3. आर्यसमाज का इतिहास, लेखक—डा. सत्यकेतु विद्यालंकार तथा प्रो. हरिदत्त वेदालंकार प्रकाशकः — आर्य स्वाध्याय केन्द्र, ए—१/३२, सफदरगंज इन्क्लेव, नयी—दिल्ली—२९

4. ऋषि दयानन्द सरस्वती के शास्त्रार्थ और प्रवचन सम्पादक— डा. भवानीलाल भारतीय, युधिष्ठिरः मीमांसक प्रकाशक—श्रीमती सावित्रीदेवी बागडिया ट्रस्ट ५, लेनिन सरणी, कलकत्ता—७०००१३

****

In Public domain. Digitization Muthulakshmi Research Academy

वेदकालीनविविधशास्त्रविज्ञानम्

Dr. V. Srinivasa Sarma

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।

विज्ञानस्य शिल्पकलादीनां च साहाय्येन मनुष्यः संसारस्य महत्तममुपयोगमुपभोगञ्च कर्तुं समर्थो भवति। मानवसंस्कृतेरादिकालादेव नित्यमेतेषां प्रगत्या सह मानवस्य भोगविलासादीनां परिधिः सुविस्तृतोऽभूत्।उपभोगपरिधौ वस्तूनां भोज्यत्वमभोज्यत्वं वा ज्ञातुमेव प्रथममायुर्वेदविज्ञानस्य समारम्भः सम्भावनीयः। उपयोगिवस्तूनां वैपुल्यं विधातुमेव कृषिविज्ञानस्य विकासः कृतः। गृहरचना प्रसाधनकर्मादिकमधिकृत्य साधरणतो गणितस्य सविशेषं ज्यामितेः प्रयोगः समुद्भावितः। प्राकृतिकसृष्टिषु प्रायः यथाप्रमाणतावयवसङ्गतिर्वा वर्तते। मानवकृतिषु सरलताया तस्या नियोजनं कर्तुमपि गणितस्यापेक्षासीत्। आयुर्वेदस्य कृषिविज्ञानस्य च सम्यक् प्रगतये वनस्पतिशास्त्रस्य भौतिकविज्ञानस्य, रसायनशास्त्रस्य, भूतत्त्वविद्यायाश्च विकासः अपेक्षित एव।

वैद्यविज्ञानम्– देवानां, रुद्रो दैव्यभिषक्त्वेन अभिवर्णितः। (कृ. य. सं. ४. ५. १२) अश्विनौ देवभिषजाविति च अभिवर्णितौ। तौ मधुविद्यामपि जानीतस्स्म। ऋ. वे. ५. ७५ अनया विद्यया ते विषमपि अमृतरूपेण परिणमयितुमशक्नुताम् ऋ. वे. १. ९१. १०. ११, तेषां वानस्पत्यौषधीनां सूक्ष्मं ज्ञानमासीत् ऋ. वे. १०. ९७. ३. ५७. ३१, ते औषधप्रोहस्थानानि शतानि जानन्ति स्म।

शतं वो अम्ब धामानि सहस्रमुत वो रुहः।
यूयमिमं मे अगदं कुरुत। (ऋ. वे. १०. ९७. ५)

तेषां त्रिधातुज्ञानमप्यासीत्, यच्च भारतीयवैद्यकस्य निदानभूतम्

त्रिर्नो अश्विनादिव्यानि भेषजा त्रिः पार्थिवानि त्रिरुत्तमद्यः।
ओमानं शंयो र्ममकाय सूनवे त्रिधातु शर्म वहतं बृहस्पतिः।। (ऋ. वे. १. ३४. ४)

जराया निवारकाणि, नवयौवनप्रदातृणि चौषधानि ते जानन्ति स्म। अश्विभ्यां देवभिषग्भ्यां च्यवनस्यर्षेर्जराया निवारणपूर्वकं यन्नवयौवनमौषधप्रदानद्वारा अनुगृहीतं तदेवात्र निदर्शनम्। (ऋ. वे. १०. ३९. ४,) १–११५–५–२, आयुर्वर्धकान्यपि औषधानि तौ जानीतः एव। १–११६–६। सोमलतायाः सूक्ष्मं गुणविज्ञानं तेषामासीत् (ऋ. वे. ६. ४७) गोक्षीरमिलितस्य सोमरसस्य यो विशेषं उपयोगः, तद्विज्ञानमपि तेषामासीत् ऋ. वे. ३–३५–८।

शरीरावयवविज्ञानेन सह रोगोद्भवस्थानविज्ञानमपि तेषामासीत् ऋ. वे. १०–१६३ पश्यत इमान् मन्त्रवर्णान्। म.

अस्थिभ्यः स्ते मजभ्यः स्नावभ्यो धमनिभ्यः।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो नखेभ्यो विवृहामिते विवृहामितो। (ऋ. वे. २–३४–६)
शतस्य धमनीनां सहस्रस्य हिराणाम्।

In Public domain. Digitization Muthulakshmi Research Academy

अस्थुरिन्मध्यमा इमाः साकमन्ता अरसंत॥ ऋ. वे. १-१७-३
ग्रीवाभ्य स्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्।
हृदयात्ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम्॥
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वृहामसि॥ अ. वे. २-३३-२, ३

अनेनेदं स्पष्टं यद्वैदिकानामार्याणाम् अस्थि, मज्जा, स्नावा, धमनि, हृदयगता प्रधाननाडी। हिरा सिराशाखानाडी ग्रीवा। ग्रीवावयवभूतानि चतुर्दश सूक्ष्माण्यस्थीति। (सा. भा) धमनी। कीमसा जत्रुवक्षोगतास्थि। अनूक्य। तत्सन्धि। क्लोम। हृदयसमीपस्थमांसपिण्डविशेषः। ह्लीक्ष्ण। क्लोमसम्बन्धी मांसपिण्डविशेषः। मतस्न। वृकयमथवा तत्समीपस्थपित्ताधारपात्रं। प्लाशि। बहुच्छिद्रमलपात्रं। इत्यादीनाम् आन्तरशरीरभागादीनां (अ. वे. २-२३-४) सूक्ष्मं विज्ञानमासीत्।

तत्कालीनाः भिषजः शल्यतन्त्रेऽपि निपुणा आसन्। छिन्नमस्तकस्य दधीचेः कबन्धेनाऽश्वशिरस्सन्धानम् युद्धे छिन्नजंघायाः विश्फलाया पुनरायस्या जंघायास्सन्धानं इत्यादीनि, यान्यश्विनोः कर्माणि तानि, तत्कालीनस्य शल्यतन्त्रनैपुण्यस्य निदर्शनभूतानि।

अन्धानां ऋज्राश्व। ऋ. वे. १-११५-१६ कण्वादीनां ऋ. वे. १-११८-७ नेत्रगोलकयोः स्थाने पुनर्नेत्रस्थापनद्वारेण दृष्टिप्रदानं, नृषत्पुत्रस्य बाधिर्यनिवारणम्। १-११७-८ घोषायाः कुष्ठनिवारणम्। ऋ. वे. १-११७-७। मातृगर्भाच्छिशोर्बहिर्नयनं। ऋ. वे. १-११९-७। इत्यादीनि यानि भैषज्यकर्माणि, तानि तत्कालीनभैषज्यप्रावीण्यस्योदाहरणभूतानि। तत्कालीनानां वैद्यानां यान्यन्यानि पुष्टिकारकाणि भेषजानि तद्विज्ञानमप्यासीत्। ऋ. वे. १०-१८३।

अनेनायं निष्कर्षं कर्तुं शक्यते, यद्वैदिके युगे, वैद्यकस्य विविधचिकित्साविधानानि, विविधानि, अगद शल्यादितन्त्राणि तैः सर्वैः भिषजः बाढं परिचिता आसन्निति। एवं वैद्यकविज्ञानविषये बहवो अंशाः समभिवर्णिताः।

भौतिकं विज्ञानम् - वैदिकानां जनानां भौतिकं विज्ञानमास्त। ते सूक्ष्मग्राहिण्या बुद्ध्या इदमजानन् यत् युद्धभूम्यां योऽग्निरन्तरिक्षे विद्युन्मेघादिरूपेणाऽऽस्थितो योऽग्निस्सूर्ये च। ग्रहनक्षत्रादिषु च। योऽग्नि स्स एक एव त्रिधा आस्थि, इति। ऋ. वे. ३-५-९) दिव्याऽऽस्थितोऽग्निरेवान्तरिक्षे पर्जन्यविद्युदात्मकेन्द्ररूपेणाऽभिव्यक्तस्सन् पृथिव्यामोषध्यादिकं उत्पाद्य सृष्ट्या हेतुभूतं सत् त्रैलोक्यं धारयतीति। यज्ञेषु आज्यादिहविष्प्रदानेन उत्पाद्यमानं यद्धूमादिकं तदेवान्तरिक्षं व्याप्य पर्जन्यादिकनिर्माणे, सूर्यकिरणद्वारेण सहायकं भवतीति च। ऋ, वे, ३-५५-२२। सूर्य एव तद्रूपोऽग्निरेव। द्यावापृथिव्योरुभयोर्धारणं। स्वरश्मिभिः। करोतीति च। मित्रस्य चर्षणी धृतश्श्रवो देवस्य सानसिं सत्य चित्रश्रवस्तमं। मित्रो जनान् यातयति प्रजानन् मित्रो दधार पृथिवीमुतद्याम् कृ. य. सं. ३-४-११-५। पृथिव्याः पोषणं द्यौरेव करोतीति विषयं निरूपयति मन्त्रोऽयम् यथा- माता च यत्र दुहिता च धेनू सबर्दुघे धापयेते समीची।

ऋतस्य ते सदसीले अन्तर्महद्देवानामसुरत्वमेकम्॥ ऋ. वे. ३-५५-१२

सबर्दुघे - क्षीरस्य दोग्ध्र्यौ धेनू प्रीणयित्र्यौ। समीचि- परस्परं सङ्गते धापयेते- स्वकीयं रसमन्योन्यं पाययतः।

In Public domain. Digitization Muthulakshmi Research Academy

ऋतस्य सदसि अन्तरिक्षेऽन्तः स्थितेः।

एवं वैदिकैः ऋषिभिः तत्तदवसरेषु स्वं यत् पाञ्चभौतिकविज्ञानं तत्तदवसरेषु प्रकटयांचक्रे। एतद्विषये द्रष्टव्याः अन्या ऋचः ऋ. वे. ३-५५-१४, ३-५५-१९, ३-२७-९ इत्यादयः।

कालविज्ञानम् - वैदिकप्रजानां षड् ऋतूनां ऋ. वे. १-५६, २, ३३, ऋतुप्रवर्तन, ऋ. वे. ३-५५-१८, मलमास ऋ. वे. २-४०-३, द्वादशराशि ३६०-३६० अहोरात्र ऋ. वे. १-१६४-११, द्वादशमास, ऋ. वे. १-१६४-१२, ग्रहणशुभाऽशुभदिनादि विज्ञानमप्यवर्तत। ऋ. वे. ३-३२-१४।

सङ्क्रमणादिविज्ञानमप्यासीत्। ऋ. वे. १०-८४-१३

कृषिविज्ञानम् - वैदिकयुगे जनाः कृषिविज्ञानेऽपि परं निपुणा लक्षिताः। वैदिकयुगे ये कर्षकाः आसन् तेषां मृत्तिकायाः क्षारोर्वरादिकस्य भेदस्य ज्ञानमासीत्। तेषां क्षेत्राणां विविधा जलसेकपद्धतीः अपि जानन्ति स्म। यथा कुल्यानां खननद्वारेण मेघजलद्वारेण तटाकसरोवरादिभ्यो जलाशयेभ्यो जलानयनद्वारेण च बाढं विदिता आसन्। वैदिकवाङ्मये क्षेत्रकर्षण, बीजावाप, सस्यवर्धन, सस्यलवन, खले धान्यहननादीनि यानिकृषिकार्याणि तानि सर्वाणि सुविशदं वर्णितानि ऋ. वे. १०-१०१, १-७, १०-७५-२, कृषकद्वारेण बलीवर्दानां याः स्तुतयः कृताः। ऋ. वे. ८-२०-१९ तास्तु तेषां क्षेत्रकर्षणसहायकभुतेषु बलीवर्देषु यत्प्रभूतं प्रेम तन्निदर्शनभूताः।

वास्तुविज्ञानम् - वैदिककाले वास्तुकला चूडान्तमस्पृशदिति वक्तुं शक्यते। तत्कालनिर्मितानि, उन्नतानि हर्म्याणि। ऋ. वे. १-१६६. ४, ७. ५६. ६ शतद्वारयन्त्रगृहाणि। ऋ. वे. १. ११७. ३। दस्युराजानां सुदृढं निर्मितानि लौहमयानि दुर्गाणि। ऋ. वे. २-२०-८ आर्याणां लौहमयपुरादीनि।ऋ. वे. ७-३-७ सहस्रद्वारगृहाणि। ऋ, वे. ७-८९. ५ त्रिष्कम्भ, त्रिभूमिका गृहाणि। ऋ. वे १०-६६-५। तापवर्षादिष्वपि सुखकराणि गृहाणि ऋ. वे. ६-६४-१। सहस्रस्थूणनिर्मितानि विशालगृहाणि। ऋ. वे. ५-६२-६। इत्यादीनि, वैदिककालीनायाः उन्नताया वास्तुकलायाः निदर्शनभूतानि।

शिल्पविज्ञानम् - वैदिकयुगे स्वावलम्बनप्रिया आर्या विविधानि शिल्पानि कृत्वा स्वामाजीविकां सम्पादयन्ति स्म। तानि यथा - नौकानिर्माण। ऋ. वे. १-१८-२-६, तक्षकार्य ऋ. वे. ९-११२-१ कुम्भनिर्माण ऋ. वे. १०-११७-६, वस्त्रवयन ऋ. वे. ६-६-३, अश्मकारशिल्प ऋ. वे. १०-९०, १०-७२ -८२ सूक्तानि। स्वर्णकार १२-२७-९। रत्नाभरण निर्माण ऋ. वे. ५-५३-४। मालानिर्माण ऋ. वे. ८-४७-१२। मुक्ताविज्ञान ऋ. वे. १-३२-४। मणिकारशिल्प ऋ. वे. १-२३-८। कर्मार, इषुकरण, धनुर्निर्माण ऋ. वे. ६-४७-१०, १०-८३-२३, ९-११२-१, खण्डनिर्माणादीनि। ऋ. वे. ६-४७-१०, १०-८७-२३, ९-११२-१, । विविधशिल्पानि शिल्पकाराः जानन्ति स्म।

गोपालनादि विज्ञानम् - ऋग्वेदे नैकानि गोसूक्तानि। ऋ. वे. १०-१६०, ४-५८, १०-१९, ६-२८। गवां हेतोः खाद्यप्राप्त्युल्लेखः ऋ. बे. १-३०-१३। गोरक्षणाय वीरपुरुषनियोजनं। ऋ. वे. ३-३१-

In Public domain. Digitization Muthulakshmi Research Academy

१०। सहस्राणां गवां दानानि। ऋ. वे १०-६२-११, ८-३-४६, ८-६-३७। विशालगोशालानां वर्णनादिकं ऋ. वे. ६-४५-२८। सर्वमपि वैदिककालीनायाः पशुसंवर्धनकलायाः उन्नतेर्निदर्शनम्। वैदिकयुगे कृषिकर्म परामुन्नतिं जगाम। तत्कालीनाः कृषीवलाः भूमिं क्षेत्रेषु विभज्य कृषिकर्म कुर्वन्ति स्म। ऋ. वे. १-११०-५,। ऋग्वेदे एकत्र इदमपि कथितं यदश्विनौ देवौ प्रथमं मनुं यवादिधान्यवपनविधानं दारिद्र्यनिर्वृत्तये अशिक्षेताम्, ऋ. वे. ४-५७-८, १०-१०१-३, ४, ४-५७-४। इति क्षेत्रकर्षणस्य कर्मण आरम्भे कर्षकाः क्षेत्रपतिपूजां कुर्वन्ति स्म। अद्यत्वेऽपि अस्मद् प्रान्तेऽपि क्षेत्रपतिपूजां कर्वन्त्येव। ऋग्वेदकालीनं यत्कृषिकर्म, तस्य सुविशदं वर्णनं वामदेवेन ऋषिणा क्षेत्रपतिसूक्ते ऋ. वे. ४-५९-१०८, एवमन्यत्रापि ऋग्वेदे साधु कृतम्। ऋ. वे, १०-१०१-३, अथर्वणवेदे एकत्रोत्तमसस्यप्राप्त्यर्थं क्षेत्रे तु पशूनां करीषस्योपयोगोऽपि अभिवर्णितः। अ. वे. ३-१४-३, ४, १९-३१-३, ऋग्वेदे बीजावापादारभ्य (वपन्तो बीजमिव धान्यकृतः पृचन्ति सोमं न मिनन्ति बप्सतः। ऋ. १०-९-१३ सस्यस्य लवनं, बन्धनं, सस्ययुक्तानां धान्यनालानां (खले न पर्षान् प्रति हन्मि भूरि ऋ. वे. १०-४८-७) खले प्रतिहनन शूर्पेन पवन (सक्तुमिव तितउना पुनन्तः ऋ, वे, १०-७१-२) धान्यकरणादीनि कर्माण्युदाहरणशैल्या साधु प्रस्तुतानि येन तत्कालीनस्य कृषिकर्मणः आभासो भवति। वैदिककाले यानि सस्यानि कृषीवला निष्पादयन्त आसन् तेषामाभासोऽधोदत्तेन मन्त्रवर्णनेनावगतो भवति। व्रीहयश्च मे, यवाश्च मे, माषाश्च मे, प्रियङ्गवश्च मे, श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे . . . . शु. य. १८-१२,
क्षेत्रेषु कूपतटाकादीनामुदकं कुल्याद्वारेण प्रवाह्य कृषीवलाः क्षेत्राणि प्रसिच्य सस्योत्पादनं कुर्वन्ति स्म। वर्षाधारेणापि, सस्योत्पादनं, यद्वृष्ट्यम्बुसेचनमिति व्यवहृतं कुर्वन्ति स्म।

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा या स्वयंजाः ऋ. वे. ७-४९-२ अत्र दिव्याः नाम अन्तरिक्षात्पतिताः खनित्रिमाः कुल्यादीनां खननेन प्रवाहिताः स्वयंजाः नद्यादि गतास्स्वयं स्रुताः। तत्कालीनस्य क्षेत्रसेचनरूपस्य कर्मणोऽनेन साध्ववगमनं भवति, यदिन्द्रस्य वीर्यवर्णनावसरे इदं कथितं यत् स वज्रेण खनित्वा नदीमार्गान् चकार आपश्च प्रवाहयामास इति ऋ. ७-४९-१, कूप ऋ. वे. ७-४९-२, तटाक ऋ. वे. ६-२८-७, सरोवरादीनां, ऋ. ९-११०-५, खननस्य भूरिसस्योत्पादनस्य च उल्लेखितत्वेन वैदिककाले क्षेत्राणां जलसेचनविधानं परमुन्नतमवर्ततेति अभ्यूहितं शक्यते।

विविधधातुविद्रावणविज्ञानम् – वैदिकानामार्याणां विविधधातुविद्रावणविज्ञानमपि अवर्तत। ऋ. वे. १-२५. २३। ऋग्वेदे स्वर्णकारद्वारा स्वर्णद्रावणस्य। ऋ. वे. ६-३-४, लौहकारद्वारा लौहमयखगादिविविधायुधनिर्माणस्य ऋ. वे. ६-४७-१०, ७-१७-७, १०-७८-८,। शम्बरादीनां लौहमयदुर्गनिर्माणादिकस्य च यद्वर्णनं कृतं तद्वर्णनादिना, तत्कालीनस्य लौहाद्रावविज्ञानस्य साध्ववगमो भवति। तत्काले रत्नादिपरीक्षाविज्ञानमपि परं सूक्ष्ममवर्तत। ऋ. वे. १-२०-७, ८-८२-२६।

भौगोलिकविज्ञानम् – कीकटदेश ऋ. वे. ३-५३-१४, गान्धारदेश ऋ, वे, १-१२६-७, सिन्धुदेश ऋ. वे. १-१२६-१ कुरुक्षेत्र ऋ. वे. १-११२-४, सरयूतटवर्तिदेश ऋ. वे. ४-३०-१८,

In Public domain. Digitization Muthulakshmi Research Academy

गोमतीतीरप्रदेश ऋ. वे. ८-२४-३०, पुष्करक्षेत्रादि विविध प्रदेशानां ऋ. वे. ८-५३-११, अर्णव ऋ. वे. ३-५३-९, चतुस्समुद्रादीनां जलनिधीनां ऋ. वे. ९-३३-६, सुषोमा, आर्जिकीया ऋ. वे. ८-५३-११, विपाट् शुतुद्री ऋ. वे. ३-३३-१, सिन्धु ऋ. वे. ३-३३-३, गङ्गा यमुना सरस्वती परुष्णी असिक्नी मरुद्‌वृधा वितस्तादीनां नदीनां ऋ. वे. १०-७५-५।

शर्यणावत्तटाकादिकस्य – ऋ. वे. ९-११२-४, च उल्लेखः तत्तत्कालीनं भौगोलिकं विज्ञानं प्रमाणयति।

ऐतिहासिकं विज्ञानम् – नहुषस्य, ऋ. वे. १०-६३-१ तत्पुत्रस्य ययातेः, तत्पुत्राणां यद्वतुर्वशादीनां राज्ञां वर्णनेन समं ययाति द्वारेण स्वपुत्रयोः केनचित्कारणेन राज्याभिषेकाभावरूप शापदानस्य च ऋ. वे. ४-३०-१७, यदुल्लेखः तत्तत्कालघटितैतिहासिकघटनानां सङ्केतकम्।

सरयूपारे चित्ररथराज्यस्य ऋ. वे. ४-३०-१८, सृंजयपुत्रस्य पुरोः दिवोदासस्य यद्राज्यवर्णनम् ऋ. वे. ६-४७-२३, पणीनां ऋ. वे. ६-५१-१४, यदुवंशीयस्य तिरिदरस्य ऋ. वे. ८-६-४७, चेदिवंशीयानां राज्ञां ऋ. वे. ८-६-३७, दाशराज्ञ युद्धस्य ऋ. वे. ७-३३-३, ६-१६, १३, १४, शुनश्शोपकथाया ऋ. वे. १-२४, मनोः पुरूरवसश्च उल्लेखः ऋ. वे. १-३१-४, यौवनाश्वपुत्रस्य मान्धातुः भरद्वाजस्यर्षेरुल्लेखः ऋ. वे. १-११२-१३, च्यवनस्य यौवनसमनुप्राप्तिवर्णनम्, ऋ. वे. १-११६-१०, ८-३९-८, भरतवंशोल्लेखः ३-५३-२४, दुष्यन्तपुत्रस्य भरतस्योल्लेखः ऋ. वे. ६-१६-४, दुह्यु, अनु, तुर्वशयदूनां राज्ञामुल्लेखः ऋ. वे. ८—१०-५, इक्ष्वाकुराज्यपालनवर्णनं ऋ. वे. १०-६०-४, इलापुत्रस्य राज्ञः पुरूरवस उर्वश्या वियोगवर्णनं ऋ. वे. १०-९५, इत्यादिकं सर्वमप्यैतिहासिकं घटनाजातमैतिहासिकविज्ञानस्य साक्षीभूतं भवति।

यानविज्ञानम् – अर्थोपार्जनसाधनेषु वाणिज्यव्यवहाराय देशदेशान्तरगमनाय द्रव्यवाहनाय सन्देशवाहनाय शत्रुजयाय शासनप्रबन्धाय च यानविमानयोर्विज्ञानं नितरामप्यावश्यकम्। यानविज्ञानस्य वर्णनं यानाविमानरथनौ शब्दैः उपलभ्यते। अग्न्यादिभिः निर्मितविमानादिभिः यानैः ते अभीष्टं स्थानं सद्यो गन्तुं प्रभवन्ति।

रथो ह वा मृतजा अद्रि जूतः परि द्यावा पृथिवी याति सद्यः ऋ. वे. ३-४८-८, ४-११-४, यजु ६-२१, यान्त्यनेन स्थानान्तरं तद् यानम्। यानपदेन सामान्यतो जलस्थलसञ्चरणक्षमं वाहनं गृह्यते, परन्तु क्वचिदाकाशचरणशीलमपि, यत्खलु विमानमुच्यते तद् विमानं हि विशेषेणमितं सूक्ष्मयन्त्रैः निर्मितं वा भवति (श. क. द्रु) तदन्तरिक्षगमनार्हं भवत्यविशेषेण। रंहतिर्गच्छति यः स रथोऽथवा रममाणोऽस्मिन् तिष्ठतीति। रथपदं सामान्येनोभयोरेव वाचकम् यानविमानयोः।

यद् देशाद्देशान्तरं द्वीपाद् द्वीपान्तरं लोकाल्लोकान्तरं पृथिव्यन्तरिक्षेषु वेगतो गन्तुमर्हति तद्वाहनं खेट शास्त्रविदो विमानपदेनाचक्षते,

> **पृथिव्यप्स्वन्तरिक्षेषु खगवद्वेगतः स्वयम्।**
> **यत् समर्थो भवेद् गन्तुं स विमान इति स्मृतः।** भ. वि. शा

तादृशाः विमानाः त्रिविधाः भवन्ति। मान्त्रिकाः तान्त्रिकाः कृतकाश्च। तत् खलु कृत-युगे मान्त्रिकैर्मन्त्रचालितैः

In Public domain. Digitization Muthulakshmi Research Academy

विमानैः कार्यसिद्धिर्भवति स्म। द्वापरयुगे त्रेतायुगे च तान्त्रिकैः तन्त्रशास्त्रचालितैः विमानैः परमद्यत्वे वर्तमाने कलौ कृतकैः कलायन्त्रचालितैः यानैः कार्यसिद्धिर्जायते। तदत्र कृतकयानानां वर्णनमेव निर्दिश्यते। कृतका अपि चतुर्विधाः भवन्ति।

ये विहङ्गाकाराः पक्षिसदृश चञ्चु पुच्छरूपाः पक्षिवद् गतिमन्तो भवन्ति, ते शकुनाभिधेयाः सन्ति साम्प्रतञ्चैरोप्लेननाम्ना श्रूयन्ते। ये खनिजपदार्थयोगैरयोनिर्मिता हिरण्यवत्कान्तिमन्ताश्च भवन्ति। ते रुक्मा उच्यन्ते। ये धूम्रपथधारावन्तः सुन्दराकृतिमन्तो भवन्ति ते सुन्दराभिधेया भवन्ति। साम्प्रतिके च जट् विमाननाम्ना श्रूयन्ते। ये जलस्थलनभःसु सञ्चरणक्षमास्ते त्रिपुरा इति नाम्ना प्रतिपाद्यन्ते। अद्यतनीया वैज्ञानिका अप्येतन्निर्मातुं समुत्सुकाः यत्नशीलाश्च सन्ति एवं चतुर्विधाः विमानाः शास्त्रे प्रोक्ताः।

अम्नायेषु नैकविधानं सङ्केतो दृश्यते

अनश्वो जातः अनभीशुरुक्थ्यो रथस्त्रिचक्रः परिवर्तते रजः (ऋ. वे. ४–३६–१)

अग्निजलसंयोगेन यन्त्रयानानि सञ्चरणक्षमाणि भवन्ति।

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः (ऋ. वे. १–१४–१२) तीव्रगतिमन्तश्च जायन्ते

नहि वामस्ति दूरके यत्रा रथेन गच्छथः (ऋ. वे. १–२२–४)

ये रथाः स्थलगामिनो मन्दगतयो भवन्ति तेऽश्वादिना पशुना सञ्चालयन्ति ये च निमेषादपि तीव्रगामिनो मनोजवा रथास्तेऽग्निजलपवनादिसंयोगेन युक्त्या चाल्यन्ते। कलायन्त्रादियुक्तेषु यानेषु नितरां विलोडितोऽग्निर्यानानि सद्यो गमयति। **निर्मथितः सुधित आ सधस्थे युवा कविरध्वरस्य प्रणेता** (ऋ. वे. ३–२३–१) अश्वप्राणियुक्ता रथा अन्तरिक्षे समुद्रे वा न गन्तुं प्रभवन्ति। तस्माज्जलचराः नभश्चरा रथा अश्वरहिता भवन्ति। ते रथास्तृणादीनि नोपेक्षन्ते **नास्मै तृणं नोदकामा भरन्त्युत्तरो धुरो वहति प्रदेदिशत्।** (ऋ. वे. १०–१०२–१०) यत स्तेष्वश्वादयः पशवो न नियोज्यन्ते तत एवं अनश्वासः इति पदेनोपदिश्यन्ते

अनश्वासो ये पवयोऽरथा इन्द्रषिता (ऋ. वे. ५–३१–४) तादृशा रथा एव मेघेषु दिवि सद्यो यान्ति

रथो ह वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः ऋ. वे. ३–५८–८) गौरकुरङ्गवत् हंसवच्च जवसा गच्छन्ति **अश्विना हरिणाविव गोराविवा नुयवसम् हंसाविवपततमा** (ऋ. ५–७८–२) ते रथा जलचरस्थलचरनभश्चरभेदात् त्रिविधाः। तत्र पूर्वं जलचराणां यानानां सङ्केतो दृश्यते। यदा कलाकौशलभ्रमण युक्तस्य यानस्याधोऽग्निमुपरि च जलं संस्थाप्य वायुना प्रदीपयन्ति तदा एतेऽग्नि जले यानं द्रुतवेगेन गमयतः (ऋ. वे. ३–२९–३, १–११६–७दयानन्दभाष्यम्) तादृशेन रमणीयेनासंख्यातकेतुयुक्तेन मनोजवेन प्रज्ञया सम्पादितेन रथेन शिल्पिनः स्वाभीष्टदेशं गच्छन्ति।

आ वां रथं पुरुमायं मनोजवं जीराश्वं यज्ञियं जीवसे हुवे।

सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानम्। (ऋ. वे. १–११९–१)

ऋग्वेदे तत्र तत्र विविधयानानां प्रसक्तिः दृश्यते एव। समुद्रतरणाय समुद्रीय पोता आसन्। (ऋ. वे. ५–४५–१०) अन्यत्र नौकानां प्रसक्तिरपि अस्ति। (ऋ. वे. १–११६–३ दयानन्दभाष्यम्) सुदीर्घानां नावानां निर्माणे तदानीन्तनाः सिद्धहस्ताः इति ज्ञातुं शक्यतेऽस्मिन् मन्त्रे (ऋ. वे. १–११६– ५) त्रिषु

In Public domain. Digitization Muthulakshmi Research Academy

अहोरात्रेषु समुद्रपारं गन्तुं नावः भवन्ति। (ऋ. वे. १-११६-४) अन्तरिक्षचरणशीलानि विमानानि सप्तचक्रयुक्तानि दृश्यन्ते। (ऋ. वे. २-४-३) खगवदन्तरिक्षे चरणशीलानि विमानानि द्रष्टुं शक्यन्ते (ऋ. वे. १-२५-६, अयस्ताम्ररजतधातुत्रयेण विरचितानि विमानानि दृश्यन्ते (ऋ. १. ३४-७) षष्ठि संख्याकानि कलयन्त्राणि स्थापनशीलानि विमानानि अपि वैदिककाले द्रष्टुं प्रभवामः एतादृशानि जलस्थलनभश्चराणि यानानि भवन्ति। इदं शास्त्रविज्ञानं दिग्दर्शनार्थं निदर्शितम्, इदं च सर्वं ज्ञानं वेदमूलकमेवेति। वैदिकसमाजे प्रजाः वेदवेदाङ्गादिभिस्समन्यशास्त्राणामध्ययनमपि कुर्वन्ति स्म। तेषां विज्ञानं सर्वतोमुखं वर्तते, वैदिककाले प्रजानां तत्तद् शास्त्रेषु गहना गतिरासीत् तत्परिचयः एवं कृतः।

उपयुक्तग्रन्थ सूची

(1) भारतीयविचारधारा – हरिहरनाथ त्रिपाठी, वाराणसी 1913.

(2) प्राचीन भारतीयविचार और विभूतिया राधाकुमुदबनर्जी दिल्ली 1958

(3) भरद्वाजविमान शास्त्रम् यम् एल् बीडी. दिल्ली 1954

(4) शब्दकल्पद्रुमः – चौखम्बा सिरीज आफीस् वाराणसी – 1961

(5) ऋग्वेदभाष्यम् – दयानन्द आश्रम अजमेर– 304001, 2005

(6) दयानन्द यजुर्वेदभाष्यभास्कर आर्ष साहित्य प्रचार ट्रस्ट दिल्ली 1972

(7) यजुर्वेदभाष्यम् – वैदिक पुस्तकालय अजमेर 1993

****

In Public domain. Digitization Muthulakshmi Research Academy

महर्षिः दयानन्दः एवं गोकरुणानिधिः

डॉ. मुक्तावाणी

अवगतदिव्यजीवनानुभवकन्दाः परमसम्माननीयाः ऋषिवराः दयानन्दमहाभागाः क्रान्तदर्शिनो मनीषिणो वेदोद्धारकाः समाजसुधारकाः अनुपमब्रह्मचर्यव्रतधारिणः लौकिकस्य वैदिकस्य च साहित्यनभोमण्डलस्य दीप्तिमान् प्रखरप्रभायुतो भास्करः आसन्। स्व–अमित–ज्ञान–आभायुत–प्रज्ञया शास्त्रार्थसमराङ्गणे वेदविरोधिनां प्रतिपक्षिणां मानमर्दनं कृत्वा तिमिररतं जनौघं नूतनपथप्रदर्शकरूपेण उपकृतवन्तः एकोनविंशतिशताब्द्याः महानायकः वेददीपप्रज्वलनरूपेण अस्माकं हृदयपटलेषु अंकितोऽभवत्। जगदिदमासीदवलिप्तं तमोनिद्रया, 'वेदान् प्रत्यागच्छत्' इत्युद्घोषणया उद्घाटितं प्रकाशद्वारम्। विज्ञानसम्मितं वेदभाष्यं विधाय सत्यार्थप्रकाशनाम अद्वितीयं विश्वधर्मकोषमयं ग्रन्थं प्रणीय ऋग्वेदादिभाष्यभूमिकां च विरचय्य विद्वन्मण्डलं चकितं कृतवान् । विखण्डिता ऋषिपरम्परा च पुनः प्रस्थापिता। न केवलं विशालाकारग्रन्थग्रथनं कृतमनेन, अपितु लघ्वाकाराः ग्रन्थाः अपि प्रणीताः यथा वर्णोच्चारणशिक्षा, संस्कृतवाक्यप्रबोधम् व्यवहारभानुरित्यादयः।

वीतरागः परिव्राट् विराट् विचारप्रचारसंचाररतः दयानन्दः स्वसमग्रसाहित्ये स्वविज्ञानसम्मितविचाराणां पोषणाय वेदानां , वेदानुमोदितानां च ग्रन्थानां प्रमाणैः ब्रह्मणः जैमिनीपर्यन्तं ऋषिपरम्परां संस्थाप्य भारतस्य गौरवगरिमां वृद्धिं चकार।

वैदिकग्रन्थानां पुनः प्रसारः व्याकरणस्योपयोगिता, सामाजिकीं, सांस्कृतिकीम्, आध्यात्मिकीम्, आर्थिकीं चोन्नतिं, पाखण्डानां खण्डनं, नारीणामुद्धारः दलितानां दलनदलनं, संस्कृतस्य सम्मानं, राष्ट्रभाषायाः गौरवं, पशूनां रक्षणं, कृषिकर्षणविकर्षणाय प्रयासः यज्ञपरम्परायाः स्थापनं, सत्यस्य, धर्मस्य न्यायस्य विस्तारमार्षपाठविधेः सविधमध्ययनाध्यापनम् इत्यादिषु क्षेत्रेषु नास्ति कश्चित् दयानन्दतुल्यः इति मे मतिः।

'महर्षिः दयानन्दः एवं गोकरुणानिधिः' इत्यस्ति मे वाच्यः विषयोऽद्य भवतां भाग्यवतां मतिमतां पुरतः। स्वनामधन्यः दयानन्दः नाम्नैव दयायाः करुणायाः च प्रतिमूर्तिरासीत्। निरीहाणां मूकानां पशूनां पक्षिणां च कष्टानि अवेक्ष्य तस्य हृदि करुणायाः सञ्चारोऽभवत्। तेषां कल्याणाय रक्षणाय च 'गोकरुणानिधिः' इति नाम्नीं लघ्वीं पुस्तिकां निर्माय विश्वस्य अस्थिराम् अधोगमनोन्मुखां चार्थिकीं स्थितिं सुस्थिरां कर्तुं नितरां प्रयत्नमकरोत्। चतुर्विंशतिपृष्ठपरिमिताकारयुतपुस्तिकायां क्रान्तदर्शिना ऋषिवरेण सुखसाधनसूत्रमाबद्धम्। ग्रन्थमिदं ग्रथयन् भूमिकायां स्वयमेव लिखति–:

तनोतु सर्वेश्वरोत्तमं बलं गवादिरक्षं विविधं दयेरितः।
अशेषविघ्नानि निहत्य नः प्रभुः सहायकारी विदधातु गोहितम्।
ये गोसुखं सम्यगुशन्ति धीरास्ते धर्मजं सौख्यमथा ददन्ते।
क्रूरा नराः पापरता नयन्ति प्रजाविहीनाः पशुहिंसकास्तत्।।

अस्मिन् पद्ये ग्रन्थस्य समग्रमपिसारं समाहितम्। भूमिकायाः अनन्तरम् ऋषिणा आर्षप्रज्ञया

In Public domain. Digitization Muthulakshmi Research Academy

"गोकृष्यादिरक्षिर्णीं सभाम् " उल्लिखन् गवादीनां पशूनां रक्षणेन सर्वेषां प्राणिनां सुख–समृद्धि–ऐश्वर्याणां वृद्धिः भविष्यति इति सम्यक् प्रतिपादितम्।

अस्यैव पुस्कस्य षष्ठे, सप्तमे च पृष्ठे ऋषिदयानन्दः कुशल अर्थशास्त्रज्ञ इव गणनापुरस्सरं लिखति यत् एकस्या प्रसूताया गोः पयसा. . . . अशीत्युत्तर एकोनविंशतिशतमानवानां तृप्तिः क्षुन्निवृत्तिश्च भवति। अथ च एकैव गौः स्वजीवनकालेऽष्टादशवारं प्रसूतिप्रक्रियां विधाय चत्वारिंशतोत्तर सप्त शताधिकपञ्चविंशति सहस्र जनानां पालनं क्षुन्निवृत्या तृप्तिपूर्वकं करोति। एका च गौः स्ववंशपरम्परायां षट्–षट् वत्स वत्सान् जनयति। षण्णां वत्सानां पयसा एकलक्ष चतुष्पञ्चाशत्सहस्र चतुःशतं चत्वारिंशच्च मानवानां पालनं भवितुं शक्यते। अनुमीयते यदेषां मांसभक्षणरूपक्रूरकर्मणा तु अशीतिः मात्रजनानां एकधा एव उदरपूर्तिः कर्तुं शक्या। अतो महत् पापमेतत् –– प्राणिनं हत्वा असंख्याकानां जनानामहितसाधनम्।

अग्रेऽपि मार्मिकं करुणायुतं दृश्यमुपस्थापयन् करुणावरुणालयो दयानन्दः लिखति यत्– "यश्च पशुः घासं पत्राणि पुष्पं च खादित्वा आरोग्यकरं बुद्धिवर्धकं सुधोपमं पयः देयात् , पुत्रपुत्रीमित्रादिवत् मनुस्यैस्सह सस्नेहं विश्वसेत्, यत्र बद्ध्यते तत्रैव तिष्ठति, प्रेम्णा आहूते सति समीपम् आगच्छेत्, स्वामिनां रक्षणार्थं तनुमनसी समर्पयेत्, येषां सर्वस्वमेव मनुष्याणां सुखसम्पादनार्थमेवास्ति।

एतादृशपरोपकाररतानां पशूनाम् अङ्गानि छुरिकया छेदनं कृत्वा स्वोदरपूर्तिं च कृत्वा संसारस्य हानिं कुर्वन्ति। किं तेभ्योऽप्यधिकं कश्चित् विश्वासघातिनोऽनुपकारिणः पापिनो भविष्यन्ति ? अतएव यजुर्वेदस्य प्रथमे मन्त्रे परमकारुणिकस्य भगवतो विधानमस्ति – **'अघ्न्या यजमानस्य पशून्पाहि।'** अर्थात् हे पुरुष! त्वमेतान् पशून् मा हिंसीः। अग्रे च महर्षिणा गोकरुणानिधेः द्वादशपृष्ठतः एकोनविंशति पृष्ठपर्यन्तं हिंसक–रक्षक–संवाद–माध्यमेन सुरुचिपूर्णं सरलरीत्या च मांसाहारः पशुहिंसा च अंधर्मपूर्णः अन्यायकारी चेति सिद्धः। रक्षकमुखाद् मनुस्मृति{5.51} माध्यमेन सप्रमाणम् अष्टघातकानां पापानां वर्णनं कृतम् –

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी।
संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः।।

अर्थात् पशुवधपरामर्शकः पशून् हत्वा छेदकः, . वधाय वाहकः, विक्रेता, पाचकः, भक्षणाय प्रस्तोता, भक्षकश्चैते पापिनः सन्ति।।

धन्याः आर्यावर्तदेशवासिनः यैः ईश्वराज्ञानुसारं परोपकाराय एव स्वसर्वस्वं समर्पितम्। ते च राजाधिराजाः स्वराज्यस्यार्धं भूभागं वनार्थं रक्षितम् येन पशवः पक्षिणश्च रक्षिताः स्युः। पवित्रा ओषधयः उत्पादिताः भवेयुः। येनारोग्यं बुद्धिबलं तनुबलं पराक्रमं च वृद्धिं गच्छेत्, तदनु च सद्गुणाः।

गोमातुः करुणक्रन्दनम् आकर्ण्य राष्ट्रकविपदविभूषितेन मैथिलीशरणगुप्तेन "भारतभारती" इत्यत्रोक्तम्–

दाँतों तले तृण दबाकर, हैं दीन गायें कह रहीं ,
हम पशु तथा तुम हो मनुज, क्या योग्य तुमको है यहीं?
हमने तुम्हें माँ की तरह है दूध पीने को दिया
देकर कसाई को हमें , तुमने हमारा वध किया,

In Public domain. Digitization Muthulakshmi Research Academy

क्या वश हमारा है भला ? हम दीन है बलहीन हैं
इसके अधिक अब क्या कहे , हाय! हम तुम्हारी गाय हैं।

अद्यतनीये विज्ञानस्य चाकचक्यचकिते युगे कलियुगे युवावर्गस्य कृते गम्भीरतया विचारणीयमस्ति यत् गोवंशविनाशेन शनैश्शनैः मनुष्यास्तित्वमपि समाप्तिं गमिष्यति। अद्य आबालवृद्धनरनार्यश्च सर्वेऽपि पञ्चगव्यनामकं पवित्रमाहारं विहाय हानिकरं चायपानं शीतपेयम् अखाद्यं पिज्जाबर्गरादिकं सेवित्वा स्वास्थ्यहानिं कुर्वन्ति।

ऋषयः क्रान्तदर्शिनो भवन्ति। अतो पूर्वमेव अस्मद्धिताय उपदेश उपदिष्टः। महर्षिदयानन्दस्य लघ्वी किन्तु महत्वपूर्णा कृतिः "गोकरुणानिधिः" अद्यत्वेऽपि सार्थका अस्ति। सर्वैरपि एषा रचना पठनीया मननीया आचारणीया च।

साग्रहं निवेदयामो वयं भारतसर्वकारस्य समक्षे यत् वधस्थलानां वर्धमाना संख्या अविलम्बेनैव अवरोधनीया। गोशालानां वर्धनाय अचिरेणैव प्रयत्नो विधेयः। यतोहि गवां रक्षणे एव मानवमात्रस्य रक्षा निहिता। देशस्य च समृद्धिरपि गोरक्षणेन भविष्यति इति ध्रुवा नीतिः।

"अहिंसा परमो धर्मः " इति पुण्यः सन्देशः सर्वत्र प्रसरेत्। "गावो विश्वस्य मातरः" गोधनं राष्ट्रवर्धनम् गोस्तु मातुः न भिद्यते, सूक्तिं सार्थकं कृत्वा मातृवत् गोमातुः रक्षणं, पूजनं संसारस्य प्राणिमात्राय कल्याणकरोऽस्ति इति चेतसि विनिश्चित्य प्रयासरताः भवेयुः सर्वे। तदा एव विश्वमिदं सुखेन, शान्त्या, क्षान्त्या, समृद्ध्या च वर्धिष्यन्ते लोकाः। यथा–

गावः श्रेष्ठाः पवित्राश्च पावना जगदुत्तमाः।
ऋते दधिघृताभ्यां च नेह यज्ञः प्रवर्तते।। {महाभारत}
गावो बन्धुर्मनुष्याणां मनुष्या बान्धवा गवाम्।
गौश्च यस्मिन् गृहे नास्ति तद्बन्धुरहितं गृहम्।। {पद्मपुराण 48.156}
गवां सेवा तु कर्तव्या गृहस्थैः पुण्यलिप्सुभिः।
गवां सेवापरो यस्तु तस्य श्रीर्वर्धतेऽचिरात्।।

****

In Public domain. Digitization Muthulakshmi Research Academy

स्वामिदयानन्दस्य उणादिनिर्वचनशैली

Sepuri Gayathri

सुविदितमेव समेषां यद्वेदानां साधु–ज्ञानार्थं षण्णां वेदाङ्गानां ज्ञानमनिवार्यमिति। षड्वेदाङ्गेषु व्याकरणस्य मुख्यत्वं प्रतिपाद्यते। उक्तं हि महाभाष्ये –प्रधानं च षड्वेदाङ्गेषु व्याकरणमिति। नवविधव्याकरणेषु पाणिनीयमेव व्याकरणं साङ्गोपाङ्गं श्रेष्ठं सारस्वतमिति समुपलभ्यते। व्याकरणं नाम – व्याक्रियन्ते अपशब्देभ्यः साधुशब्दाः पृथक्क्रियन्तेऽनेनेति व्याकरणम्।

पाणिनीयव्याकरणस्य सामान्यं नाम शब्दानुशासनमस्ति। शब्दानुशासनं नाम – शब्दाः अनुशिष्यन्ते प्रकृति–प्रत्ययादिरूपेण विविच्य बोध्यन्तेऽनेनेति शब्दानुशासनम्। पाणिनिना स्वशब्दानुशासनस्य परिशिष्टरूपाणि धातुपाठः, गणपाठः, उणादिसूत्रम्, लिङ्गानुशासनमित्येतानि चतुःसङ्ख्याकानि पुस्तकानि च विरचितानि। यतो हि कस्यचनापि व्याकरणस्य सर्वाङ्गता धातुसूत्रादिभिरेव संभवति, नान्यथेति। उच्यते च ––

धातुसूत्रगणोणादिनामलिङ्गानुशासनम्।
आगमाः प्रत्ययादेशा उपदेशाः प्रकीर्तिताः।।

सूत्र–धातु–गण–उणादि–लिङ्गानुशासनाख्याः पञ्चभागेषु सूत्रपाठो मुख्यो भागः। इतरे च तत्सहायकाः। इत्थं भाषाविज्ञानदृष्ट्या पाणिनीयव्याकरणं संसारस्य सर्वाण्यपि व्याकरणान्यतिशेते। आचार्य–पाणिनिना स्वपञ्चाङ्गव्याकरणपूर्त्यर्थम् "उणादयो बहुलम्(३–३–१)" इति सूत्रेण सङ्केतितानामौणादिक–प्रत्ययानां निदर्शनाय उणादिपाठस्य प्रवचनं विहितम्।

यद्यप्युणादिप्रकरणं व्याकरणस्य गौणमङ्गम्, तथापि स्वीयशब्दसाधुत्वबोधकाव्याहतशक्त्या विशिष्टं स्थानं लभते। अनयैवाव्याहतशक्त्योणादिसूत्राणि वैदिकशब्दानां व्युत्पत्तौ महत् साहाय्यमाचरन्ति। उणादिपाठस्य कृते उणादिकोश, उणादिगण, उणादिनिघण्टु, उणादिगणसूत्रमित्येवमादीनि विभिन्न–नामानि समुपलभ्यन्ते। तद्यथा – पञ्चपाद्युणादिपाठस्य व्याख्यात्रा महादेव–वेदान्तिना तथा स्वामिदयानन्दसरस्वति–प्रभृतिभिर्वैयाकरणैः उणादिपाठः उणादिकोशत्वेन व्यवहृतः। उणादिपाठस्य द्वौ पाठौ उपलभ्येते – **दशपादी पञ्चपादीश्चेति।**

पञ्चपाद्युणादिपाठस्य स्वरूपम् –

व्याकरणशास्त्रे शब्दार्थबोधे शब्दनिष्पादने च उणादिसूत्राणि स्वीयविशेषभूमिकां निर्वहन्ति।पञ्चपादीति–नाम्ना व्यवह्रियमाणः उणादिपाठोऽयं पञ्चसु पादेषु विभक्तो वर्त्तते। पाठेऽस्मिन् प्रायेण सार्धसप्तशतं सूत्राणि, त्रिशतं प्रत्ययाश्च वर्तन्ते। यैः प्रत्ययैः २७००= सप्तशदुत्तरद्विसहस्रस्य वैदिक–लौकिक–शब्दानां साधुत्वं प्रदर्शितम्। प्रायः सर्वेऽपि वेदभाष्यकाराः स्वीयवेदभाष्येषु उणादिसूत्राणि भूरिशः उदाहरन्ति। यतो हि वैदिकशब्दानामर्थनिरूपणसमये निरुक्तं केवलं निर्वचन–प्रकारमेव प्रस्तौति, परन्तु उणादिसूत्रेषु प्रकृति–प्रत्ययविभागनिर्देशपूर्वकं यौगिकरूढिशब्दानाञ्च निर्देशो भवति। अपि च प्रत्ययाश्रितानुबन्धैः स्वरप्रक्रियापि अनुपेक्षिता भवति। इमे औणादिकाः प्रत्ययाः शब्दानुशासनादन्यत्र पठितपि उणादयो बहुलम्(३–३–१)

In Public domain. Digitization Muthulakshmi Research Academy

इत्येकेनैव सूत्रेण सङ्गृहीताः, यथा – "भूवादयो धातवः (१–३–१)" इत्यनेन सर्वे धातवः। अत एव चेमे शब्दानुशासनस्थां प्रत्ययार्धधातुकादिसंज्ञां णिदादि कार्यं च लभन्ते।

उणादिकोशस्य माहात्म्यम् – तथा च भगवता पतञ्जलिना उणादिसूत्राणां महत्वं तिसृभिः कारिकाभिः इत्थं प्रत्यपादि–

बाहुलकं प्रकृतेस्तनुदृष्टेः प्रायः समुच्चयनादपि तेषाम्।
कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु॥
नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्।
यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्॥
संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनुबन्धमेतच्छास्त्रमुणादिषु॥महाभाष्यम् (३–३–१)॥

अर्थात् कतिपय–धातुभ्य एव उणादिप्रत्ययविधानं दृश्यते। ततो भिन्नाभ्योऽपि प्रकृतिभ्यः प्रत्ययाः उपलभ्यन्ते। यथा – हृषेरुलच् इति हृषि धातोरुलच् प्रत्ययो विहितः। शकि शङ्कायाम् इत्यास्मदप्युपलभ्यते – शङ्कुलः इति साधनीयम्। तथा प्रत्ययाः खल्वपि स्वल्पाः पठिताः अर्थात् समेषामपि प्रत्ययानां समुच्चय–पाठो न विहितः। उणादि–प्रत्ययानां प्रायेण समुच्चितत्वाद् बाहुलकमिहोच्यते। अविहिता अपि प्रत्ययाः बाहुलकेन समुन्नीयते। यथा – ऋ धातोः फिड–फिड्डावौणादिकावविहितौ प्रत्ययौ विधाय ऋफिड ऋफिड्ड इति साधयन्ति। अस्मिन्नुणादिशास्त्रे प्रकृति–प्रत्ययाः प्रायेण समुच्चिताः, न सर्वे। कार्याण्यपि न सर्वाणि निर्दिष्टानि, अशक्यत्वात्। अतः इदं शास्त्रं दिङ्मात्रप्रदर्शनपरम्। अनेन प्रकारेण अनुक्तापि लौकिक–वैदिकोभयविधाः शब्दाः व्युत्पादनीया इति शास्त्रकारस्य निर्णयः। अपि च प्रकृति–प्रत्ययेषु कार्याण्यपि न निःशेषाणि कृतानि सन्ति। अर्थात् न सर्वाणि कार्याणि लक्षणेन परिसमाप्यन्ते। यथा – ऋ धातोः फिड्–फिड्डौ प्रत्ययौ, अत्र गुणाभावार्थं ककाराद्यनुबन्धः न कृतम्। गुणाभावः कथमिति चेत् – बाहुलकात्। इत्यवाद्यर्थं बाहुलकमुक्तम्। बहुलवचनादिति उणादयो बहुलम् (३–३–१) इत्यत्र निर्दिष्टं बहुलपदं सर्वस्मिन्नप्युणादिशास्त्रे सम्बद्ध्यते। बहूनर्थान् लाति आददातीति बहुलम् – आतोनुपसर्गे कः (३–२–३) इति क–प्रत्ययः। बहुलस्य भावः बाहुलकम् – द्वन्द्वमनोज्ञादिभ्यश्च (५–१–१३३) इति मनोज्ञादित्वात् वुञ्। तथा चाहुर्बहुलप्रयोजनानि पूर्वाचार्याः –

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहूधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥

भगवता भाष्यकारेण पतञ्जलिनापि उणादयो बहुलम् (३–३–१) इति सूत्रे बहुलप्रयोजनम् वर्णयन्नाह –

नैगमरूढिभवं हि सुसाधु। नैगमाश्च रूढिभवाश्चौणादिकाः सुसाधवः कथं स्युः अर्थात् नैगमानां रूढीनां चौणादिकशब्दानां सुसाधुत्व–ज्ञापनार्थमेव बहुलशब्दो निर्दिष्ट इति। इदमेव उणादिसूत्राणां मुख्यं प्रयोजनमित्यपि स्पष्टं प्रतिपादितम्। अनेन स्फुटं यत् भाष्यकारमते वैदिकाः शब्दाः यौगिकाः योगरूढाश्च भवन्ति। नैरुक्तानां मते तु – **नाम च धातुजमाह निरुक्ते** (महा. ३–३–१) इत्यनुसारेण सर्वाणि नामपदानि धातुजानि भवन्ति। इदमेव

In Public domain. Digitization Muthulakshmi Research Academy

शाकाटायनमतमपि। उक्तं च यास्काचार्येण निरुक्ते – तत्र नामानि आख्यातजानीति, शाकाटायनो नैरुक्तसमयश्च (निरु. १–१२) अपि च "उणादयो बहुलम् (३–३–१)" इत्यत्र "पुवः संज्ञायाम् (३–२–१८५)" इत्यतः संज्ञाग्रहणमनुवर्त्य उणादिप्रत्ययान्ताः संज्ञाशब्दाः इति संगिरन्ते। यदि हि सर्वे औणादिकाः संज्ञाशब्दाः स्युस्तर्हि तत्र – तत्र संज्ञाग्रहणं "शकुन्याद्युपाधिग्रहणं (उ. १–१२७)" चानर्थकं स्यात्। अत एव वक्ष्यत्याचार्यः – अत्र संज्ञाग्रहणेन ज्ञायते उणादयः सामान्यार्थे यौगिकाः भवन्तीति, संज्ञायास्तस्मिन्नर्थे रूढत्वात्। यदि च प्रकृति–प्रत्ययविभागेन औणादिकेभ्यो यौगिकार्थो न निस्सरेत्, तर्हि सर्वे उणादिस्थाः शब्दाः संज्ञावाचकाः स्युः, पुनः संज्ञाग्रहणमनर्थकं स्यादिति। उज्जवलदत्तस्तूणादौ – संज्ञाधिकारे पुनः संज्ञाग्रहणं प्रायेणोणादीनां यौगिकत्वसूचनार्थमिति। व्युत्पत्तिकारस्तु – रूढियौगिकाभ्यामुणादौ शब्दाः सिद्ध्यन्ति। यौगिके तु धात्वर्थं प्रति कारकान्वयो भवत्येव इत्याह।

स्वामि दयानन्दसरस्वत्याः वृत्तेः वैशिष्ट्यम् ––

सर्वत्रापि महर्षि–दयानन्देन यास्कोऽनुसृतः।यथा यास्काचार्येण निर्वचनमाध्यमेन वैदिकशब्दानां नैकेऽर्थाः प्रदर्शितास्तथैव महर्षिणापि। यथा– पृथिवी, गौः, पशुः, इन्द्रियाणि, रश्मयश्च सर्वेऽप्येतेऽर्थाः निरुक्तकारेण गोशब्दस्य प्रदर्शिताः। तथैव महर्षि–दयानन्देनापि इमामेव शैलीमनुसृत्य रथः, यज्ञः, बृहस्पतिः, सरस्वती, अश्विनौ, अग्निः, इन्द्रादीनां वैदिकशब्दानां नैकेऽर्थाः प्रदर्शिताः। गौः – गच्छति यो यत्र यया वा सा गौ पशुः इन्द्रियं सुखं किरणो वज्रं चन्द्रमा भूमिर्वाणी जलं वा।

निघण्टावपि – गौः शब्दं "पृथ्वीनामसु (१–१)", "वाङ्नामसु (१–११)", रश्मिनामसु, स्तोतृनामसु अपि उल्लिखितमस्ति।

अप्सराः – अपसरति विरुद्धं गच्छतीति अप्सराः विद्युत्। यद्वा अद्भ्यः सरन्तीति अपसरसः। अथवा अप्सु जलेषु प्राणेषु अन्तरिक्षेषु वा सरन्तीति अपसरसः किरणा वा।

तथा च नैगमरूढिभवं हि सुसाधु इत्युक्त्वा वैदिकलौकिकशब्दयोः भिन्नत्वमभिव्यञ्जितम्। अर्थात् नैगमाः = वेदस्य शब्दाः योगिका एव सन्ति, न तु रूढाः इति वैदिकशब्दानां यौगिकार्थद्वारा सर्वेऽपि मिथ्यापवादाः निरस्ताः। अनेन वेदानां अपौरुषेयत्वं सार्वकालिकत्वं सार्वभौमिकत्वञ्च प्रमाणीकरोति। अनेनैव कारणेन तद्भाष्यं व्यावहारिकं लोकोपयोगि च सञ्जातम्। रूढिपक्षं समाश्रित्य वेदेषु वसिष्ठादिभिः शब्दैरितिहासभ्रान्तिः भवत्येव। यौगिकपक्षेऽयं दोषः न समुदेति। तत्र त्वेते शब्दाः नानार्थकवाचकाः, न तु पुरुषविशेषवाचकाः इति स्वामिदयानन्दस्य भाष्यपरिशीलनेनापि ज्ञायते।अमुमेव पन्थानमाश्रित्य पं. युधिष्ठिरमीमांसकेन मीमांसायां पशुहिंसा निवारिता। एतच्च महर्षि–दयानन्दस्य महत्योगदानम्। उणादिपाठस्य यावत्यो वृत्तयः समुपलभ्यन्ते, तासु सर्वासूणादि–वाङ्मये केवलम् महर्षिदयानन्दवर्याणां इयमेवैका वृत्तिर्यस्यां शब्दानां प्रत्येकं यौगिकार्था रूढार्थश्च पार्थक्येनोच्यते। अर्थात् यौगिकार्थं वैदिकदृष्ट्या, तथा रूढ्यर्थं च लौकिकदृष्ट्या प्रतिपादयति। अत एव स्ववृत्तिं वैदिक–लौकिक–कोषनाम्ना आख्यायते। प्रत्येकस्य पादस्य व्याख्यान्ते ते इत्युणादि व्याख्यायां वैदिक–लौकिक–कोषे प्रथमः पादः इति उल्लिखन्ति।

In Public domain. Digitization Muthulakshmi Research Academy

यौगिकरूढार्थौ च यथा –प्रथमाध्यायस्य प्रथमसूत्रस्य व्याख्यायां कारु–वायु–जायुप्रभृतिशब्दान् इत्थं व्याचक्षते –

करोतीति कारुः कर्त्ता शिल्पि वा।

जयत्यभिभवति तिरस्करोति शत्रूनिति जायुः शूरः।

जयति रोगानिति जायुरौषधं वैद्यो वा।

पाति रक्षतीति पायुः रक्षकः

इत्यादिषु सर्वेषु, कर्त्ता शूरः, रक्षकः इत्येवमादयः यौगिकार्थाः। शिल्पि औषधमिति योगरूढार्थाः प्रदर्शिताः। अपि चैतेषु व्याख्यानेषु अनेकवेदार्थसम्बन्धिनां सिद्धान्तानामपि प्रतिपादनं विहितम्। तद्यथा – **वाति गच्छति जानाति वेति वायुः पवनः परमेश्वरो वा** इत्यत्र सर्वे गत्यर्थाः ज्ञानार्थाः इति, अथवा गतेस्त्रयोऽर्थाः ज्ञानं गमनं प्राप्तिश्चेति।प्राचीनवैदिकमतमनुसृत्य वातीत्यस्य जानातीत्यर्थोऽपि निर्दिष्टः। भगवान् सर्वेश्वरोऽत्र वायुपदेन निर्दिष्टः। अत्र वेदेषु प्रमाणमपि वर्त्तते –

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।

तदेव शुक्रं तद्ब्रह्मा ता आपः स प्रजापतिः।। (यजु. ३२–१)

वायुर्ह्येव प्रजापतिस्तदुक्तमृषिणा पवमानः प्रजापतिः। (ऐत. ब्रा. ४–२६)

यो वै वायुः स इन्द्रो य इन्द्रः स वायुः। (शत. ब्रा. ४–१–३–१९)

"अयं वै वायुर्विश्वकर्मा। (यजु. १३–४४)" "वायुर्वै स्तोता। (तैति. ब्रा. ३–९–४–४)"

भगवत्पादश्रीशङ्कराचार्या अपि अग्निवाय्वादिवैदिकशब्दाः धात्वर्थं निमित्तीकृत्य ईश्वरवाचकाः इति मतं समर्थयन्ति। तथापि – अग्निशब्दोऽत्यग्रणीत्वादियोगाश्रयेण परमात्मविषय एव भविष्यति (वेदान्तभाष्यम् १–२–२९) प्रथमसूत्रस्य हि व्याख्यायां मायुशब्दस्य निष्पत्तिं प्रदर्श्य, प्रसङ्गात् गोमायुशब्दस्य निर्वचनं वक्ति –– यो मिनोति प्रक्षिपति स मायुः अथवा मिनोति प्रक्षिपत्यूष्माणमिति मायुः पित्तम्। यो विकृतां वाचं मिनोतीति गोमायुः श्रृगालः इति। बहुलवचनात् – स्नाति शोधयत्यङ्गानिति स्नायुः नाडी वा। कवयते लोलश्चञ्चलो भवति येनेति काकु– भयादिः ध्वनिविकारो वा। हल्यते छिद्यतेऽन्नमनेनेति हालुः दन्तो वा। वसति जगदस्मिन् सर्वस्मिन् वा, यो वसति स वायुः ईश्वर इत्यादि।

विष्णुः – वेवेष्टि व्याप्नोति चराचरं जगत् स विष्णुः परमेश्वरो वा।

उक्तं च ऋग्वेदे – तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। (ऋग्. ८–२–७–५)

कौषितकी ब्राह्मणेऽप्युक्तम् – कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति। (ऋग्. १–१६४–४७)

अत्र सूरयः रश्मय एव हरय उक्ता, न तु अश्वः। मन्त्रार्थः – सूर्यरश्मयो जलानि धारयन्तः द्युलोकं यान्ति, यदा ते परावृत्य पृथिवीं परागच्छन्ति, तदा पृथिवी घृतेन = जलेन पूर्णा भवतीत्यर्थः।

वृत्तिरियं यद्यपि स्वल्पाक्षरा तथाप्यौणादिक–वाङ्मये सर्वाधिक–महत्वपूर्णा उणादिवृत्तिष्वियं वृत्तिरुत्कृष्टतमेति स्पष्टम्। तथा च उणादिप्रकरणे परिगणितशब्दानां काचित् इयत्ता नास्ति। अनन्ताः उणादिप्रत्ययनिष्पन्नाः सर्वेऽपि शब्दाः तत्र परिगणयितुं नैव शक्यन्ते, ये तत्र परिगणिताः, ते तु केवलं

In Public domain. Digitization Muthulakshmi Research Academy

निदर्शनमात्रमेव। अत एव पाणिनिना उणादिसूत्राणि कृत्प्रकरणे न पठितानि, अपितु यान्युणादिसूत्राणि अन्यैरन्यत्र यथा पठितानि, तानि उणादयो बहुलम् इति सूत्रं पठता तेन महर्षिणा तथैव स्वीकृतानि। तथा च कृदन्तप्रकरणे व्युत्पादितुमशक्यानां कतिपयशब्दानां परिगणनमुणादिप्रकरणे कृत्वा भगवता पाणिनिना तेषामपि निष्पत्तिः प्रकारः सम्यक् प्रादर्शि। अनेन विधिना निर्दिष्टौणादि प्रत्ययवदन्येऽपि अनिर्दिष्टाः प्रत्ययाः कल्पयितुं शक्यन्ते इति उणादयो बहुलम् इति सूत्रस्याशयः। अर्थात् येषां शब्दानां प्रकृति-प्रत्यय-विशिष्ट-स्वरूपं लक्षणैरज्ञातं तेषां प्रकृतिं वीक्ष्य प्रत्ययः, प्रत्ययमवलोक्य प्रकृतिश्च ऊह्याः कल्पनीयाश्च। इत्थमेव धातुप्रत्ययगतकार्यविशेषमवलम्ब्य अनुबन्धाः ज्ञातुं शक्यन्ते। तद्यथा – यदि काऽपि संज्ञा ऋफिड् इति विद्यते, तर्हि अस्याः सिद्धिः केनापि व्याकरण-नियमेन न संभवति। तदा उणादिप्रकरणानुसारं ऋ गमानार्थक-धातोः फिड् प्रत्ययस्य कल्पनां कृत्वा, फिड् कित् इति मत्त्वा गुणाभावे शब्दसिद्धिः करणीया। इदमेकमुदाहरणमात्रमेव, एवं लक्षशः उदाहरणानि भवितुमर्हन्ति।

अपि च स्वामि-दयानन्दसरस्वतिना उणादिक्रोशे शब्दानां यौगिकपक्षमाश्रित्य निर्वचनपूर्वकमर्थाः प्रादर्शि। अन्यवृत्तिकारैस्तु रूढिपक्षं समाश्रित्य शब्दानामसीमितोऽर्थाः सीमितक्षेत्रे निबद्धाः। दयानन्दस्तु अन्ते वा शब्दस्य संयोजनेन यावन्तोऽप्यन्येऽर्थाः समभवन्त्यस्मिन् तेषां समेषां समाश्रयणं कृतवान्। वा शब्दोऽत्र समुच्चयार्थे अस्ति-वायुर्वा त्वामनुर्वा त्वा इति (१-४, ५)। तथा चाह यादवप्रकाशः –

निषेधे पृथग्भावे वा विकल्पोपमानयोः।
समुच्चये चैव पापे च वाक्यारम्भप्रसिद्धयोः।।

इत्थं स्वामि-दयानन्दस्थवृत्तिः यास्क-पतञ्जलि-प्रभृतिभिः ऋषिभिरनुमोदिता वेदानुकूला च वर्त्तते।

****

सन्दर्भग्रन्थसूची ---

1. उणादिकोशः – महर्षिदयानन्दसरस्वती।
2. निरुक्तम् – यास्कः।
3. महाभाष्यम् – महर्षि-पतञ्जलिः।
4. ऋग्वेदः।
5. यजुर्वेदः।
6. ऐतरेय-ब्राह्मणः।
7. शतपथ- ब्राह्मणः।
8. तैतीरिय-ब्राह्मणः।

In Public domain. Digitization Muthulakshmi Research Academy

सत्यार्थप्रकाशे अध्ययनाध्यापनविधिः

श्री दीपकः

विद्यायाः महत्त्वम्ः सुविदितमेवैतद्भवतां समेषां यदस्मिन् जगत्यत्यमूल्ये वस्तुनी द्वे वर्तेते धनं विद्या च। अत एव–

'क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्' ।। इति।

तत्रापि विद्यायाः बहु प्राबल्यं मुख्यत्वं च वयं पश्यामः। सा च विद्या शिक्षा धात्वर्थिका अध्ययनाध्यापनरूपा अथवा शिक्षाशिक्षणरूपा। बहुभिः कविवर्यैर्बहु स्तुता वर्तते एषा विद्या – यथा,

'विद्याभोगकरी यशः सुखकरी विद्या गुरूणां गुरुः' इत्यादि . . ।

अपि च, 'विद्या परा देवता' ति । अत एव, स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते' इत्यपि प्रतिपादितम् बहुषु स्थलेषु।। एवमेव विद्याविहीनः पशुसमः इत्यपि प्रतिपादितम् , यथा –

'साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानाः तद्भागदेयं परमं पशूनाम्' ।। इति लोकोक्तिः।

तथा चं ये मानवाः न भुवि भारभूताः, पशुसमाः भवितुम् इच्छन्ति ते सर्वे यथाशक्ति वा ततोऽधिकोत्साहेन वा यथाकथञ्चित् विद्योपार्जनं कुर्युः।। यतो हि , तादृशी विद्या एव पुरुषस्याधारभूताभूषणभूता च , तत्रास्ति संस्कृतकविवाणी –

'केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।' इत्यादि।।

एवं विधविद्यायाः माहात्म्यं सम्यगनुभूताः महामहिमानः सन्तः ज्ञानिवरेण्याः सत्पुरुषाः विद्योपार्जनायास्मान् सुबोधयन्तः जागरयन्तः सन्तः दरीदृश्यन्ते। तेषु अन्यतमः श्रेष्ठः चकास्ति श्री दयानन्दसरस्वतिस्वमिपादाः।। ते च विद्यायाः माहात्म्यमेवमुद्घोषयन्ति–

विद्याविलासमनो धृतशीलशिक्षाः सत्यव्रता रहितमानमलापहाराः।
संसार दुःखदलनेन सुभूषिता ये धन्या नरा विहितकर्मपरोपकाराः।। इति ।

एते महानुभावाः स्वाभिप्रायं निःसङ्कोचं प्रतिपादयन्ति। परन्तु सर्वत्र महानुभावानामनुभवं वा शृतिस्मृतिग्रन्थानां वा उल्लेखं प्रदर्शयन् स्वाभिप्रायं प्रकाशयन्ति, न पुनः स्वकपोलकल्पितं ब्रुवते। एतेषां महानुभावानां विचारधारा अतिगहना देशकालोचिता सुस्पष्टा च प्रचकास्ति।अद्यत्वे एतेषां वचनानामनुसरणमत्यावश्यकं भवति। जगतः सुखाय भवति. एतेषां मार्गदर्शनम्। यतोऽहि अद्यत्वे जनाः केवलं भोगलोलुपाः, त्यक्तस्वधर्माचरणाः, असत्यपरायणाः धनमदान्धाः च दरीदृश्यन्ते। केचन मातापितरः स्व स्व

In Public domain. Digitization Muthulakshmi Research Academy

सन्तानविषये तेषां विद्योपार्जनविषये च साम्प्रतं दत्तावधानाः विरलाः एव दृश्यन्ते। एतानुद्धिश्य स्वामीदयानन्दः एवं कथयन्ति –

"माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभा मध्ये हंसमध्ये बको यथा।। इति।

एवं च सर्वे जनाः विद्या विनयसम्पन्नाः भवेयुः इत्येव एतेषामाशयः।। अतः अस्मिन् अध्ययनविषये के के अंशाः अनुसन्धेयाः, के के विद्याभागिनः भवितुमर्हन्ति, कथं वा तस्याः उपार्जनं करणीयमित्यादिविषयानधिकृत्य प्रतिपादितवन्तः स्वस्मिन् सत्यार्थप्रकाशे ग्रन्थे। तत्रस्थतृतीयोल्लासगतविद्योपार्जनाङ्गभूतं "पठनपाठन" विषयमधिकृत्य मुलग्रन्थोक्तमार्गेण यथामति विविच्यतेऽस्मिन् प्रबन्धे।

- यदा बालबालिकाः अष्टवर्षीयाः भवन्ति तदानीमेव ते गुरुकुलं प्रेषणीयाः।
- तत्रापि तेषां बालबालिकानाम् आवासः पाठशाला च एकत्र न भवेत्।
- यथा तेषां दर्शन–स्पर्शन–एकान्तसेवन–भाषण–विषयकथा–परस्परक्रीडा–विषयध्यान–सङ्ग–इत्याकारकाष्टविधमैथुनानि न भवेयुः तथा व्यवस्था कल्पनीया।।
- ते सदा शुद्धमनस्काः शुचिगात्राः सन्तः विद्यामार्जयेयुः।।
- गुरुजनाः अपि एतेषां शिष्याणां सर्वविधविद्याभिवृद्धये दत्तावधानाः सन्तः एतादृश मनोविकारकारणीभूतविषयेभ्यः तान् प्रयत्नपूर्वकं रक्षेयुः।।

एतादृशनियमाः केवलश्रवणेन मनसि विभिन्नभावानां प्रश्नावलीं वा प्रबोधयेयुः, किन्तु इदमत्र चिन्तनीयम् यदि मनसि विद्योपार्जनावसरे विषयाभिलाषाः प्रविशन्ति तर्हि प्रक्षुब्धं मनः विद्योपार्जनात् विमुखं भवति। इन्द्रियनिग्रहाभावः मनुजस्य औन्नत्यं घातयति। अतएव पाठशाला ग्रामात् एकयोजनमितदूरे (चत्वारः क्रोशाः) भवेत्। एतेनाध्ययनावसरे मनः नगरकालुष्यदोषदूषितमपि न भवति । अत एव एते नियमाः स्वामिभिः प्रतिपादिताः इति प्रतिभाति।

गुरुकुले आन्तरिक व्यवस्था: गुरुकुलेषु सर्वेषां समवस्त्रता भवेत्, वसनशयनव्यवस्था च समानरूपा भवेत्। विद्यार्थी राज्ञः वा दरिद्रस्य वा धनिकस्य वा सामान्यजनस्य वापत्यं भवतु गुरुकुले सर्वेषु विद्यार्थिषु समदृष्टिः भवेत्। एतेन विद्योपार्जनावसरे आन्तरिकभेदाः दूरीभवन्ति । एतेन सामरस्यं एकता च समुल्लसति।।

गुरुकुलप्रेषणम्: गुरुकुलप्रेषणं केषां केषां भवेत् कदा प्रेषणीयं कथंभूताः प्रेषणीयाः तत्र नियमाः के इत्यपि अत्र प्रतिपादितं वर्तते। गुरुकुलं प्रति प्रेषणात् पूर्वं बालस्य उपनयनसंस्कारः बालिकायाश्च यथायोग्यं संस्कारश्च भवेत्।

उपनयनम्: अथ किं नाम 'उपनयनम् ? 'उप+नयनम्' उप इति सामीप्यार्थे भवति नयनं णीञ् धात्वर्थः प्रापणम्, तदेव नयनं नाम, तथा च समीपे नयनम् इति जातम्, तर्हि उपनयनम् = समीपे नयनम् इति सामान्यशब्दार्थः। अथ कस्य समीपे नयनम्–यस्य प्राप्तिः अवश्यं भाव्यमस्ति, यस्य प्राप्तये सर्वे जनाः तपन्ति परितपन्ति, यस्य प्राप्तिः एव जीवितध्येयमस्ति येन विज्ञातेन सर्वं विज्ञातं भवति इति उपनिषदपि यत् प्रतिपादयन्ति तादृशस्य आनन्दमयस्य परब्रह्मणः प्राप्तये उपकुर्वतः गुरोः समीपगमनमेव उपनयनम्।

In Public domain. Digitization Muthulakshmi Research Academy

एतादृशोपनयनमेव आत्मसाक्षात्कारकारणीभूतविद्योपार्जनाय प्रथमं सोपानं भवति। अतः अत्र अध्यापनविषयकप्रबन्धेऽपि एतस्य निरूपणं समुचितं भवतीति भावयामि। मनुना उपनयनकालः एवं निर्दिष्टः—

गर्भाष्टमेऽब्धे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः।। (2-36)

अन्यदपि— **ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।। इति।

अष्टमाब्धः उपनयनस्य प्रशस्तः कालः इति सामान्यनियमः। विशेषः विशेषावस्थायां स्वीकृतः विशिष्टफलदायकः इति व्यवस्था। अत एव स्वामिपादाः अष्टवर्षीयाणामेव बालानां गुरुकुलवासयोग्यत्वं प्रतिपादितवन्तः।

इदानींतनकाले प्रायः एते नियमाः, संस्काराशच श्रवणानन्दसुन्दराः पुस्तकमात्रदर्शिनः सञ्जाताः इति तु दौर्भाग्यमस्माकम्।।

यत्र मनुः वैश्यस्यापि उपनयनम् इत ऊर्ध्वं न भवेत् इति न्यषेधि। तादृशे चतिर्विंशिति तमे वर्षे अतीते अपि ब्राह्मणस्य सव्ये यज्ञोपवीतं न धारयन्तीति अहो बुद्धिमतां बुद्धिः। तत्र उपनयने प्रधानतया गायत्र्याः अर्थानुसन्धानपूर्वकम् उपदेशो भवेत्। गायत्र्याः अर्थानुसन्धानविषये स्वामिनां दयानन्दसरस्वतिमहाभागानां वचांसि एवोद्दर्तुमिच्छामि।

'ओं भूर्भुवःस्वः तत्सवितुवरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।' इति खलु गायत्रीमन्त्रः। तस्य मन्त्रस्य भावस्तु —हे परमेश्वर, हे सच्चिदानन्दस्वरूप, हे नित्यशुद्धस्वरूप, हे कृपानिधे, हे न्यायकारिन्, हे अज, निरञ्जन, निर्विकार, हे सर्वान्तिर्यामिन्, हे सर्वाधार, हे सर्वजगत्पितः, सकलजगदुत्पादक, हे अनादे, विश्वम्भर सर्वव्यापिन्, हे करुणावारिधे, सवितृदेव, तव यत् ओं भूर्भुवस्वः वरेण्यं भर्गः (मन्त्रः) अस्ति तत् वयं धीमहि दधीमहि धरेमहि ध्यायेम वा, कस्मै प्रयोजनाय इत्यत्राह —भो भगवन् यः सवितृदेवः परमेश्वरो भवान् अस्माकं धियः प्रचोदयात्। स एव अस्माकं पूज्यः उपासनीय इष्टदेवो भवतु नत्वन्यो यद्वस्तु भवत्तुल्यं भवतोऽधिकं च क्वचित् कदाचित् मन्यामहे इति।

एवं सार्थं गायत्रीमनुब्रूय सन्ध्योपासनादिविषयान् अपिच मनसः शरीरस्य च पवित्रीकरणसम्बद्धान् कांश्चन विषयान् सप्रमाणं प्रतिपादयन्ति स्वामिपादाः — यथा — आचमनप्राणायामादिकं प्रतिपादयन्ति । तत्र आचमनविषये प्रमाणानि आह—

अद्भिः गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिः ज्ञानेन शुध्यति ।। (मनुस्मृतिः—५—१०९)

अग्रे तत्रैव मनुस्मृतौ आचमनप्रकारमाह—

ब्राह्मेण विप्रतीर्थेन नित्यकालमुपस्पृशेत
कायत्र्यैदाशीकाभ्यां वा न पित्रेण कदाचन।।

In Public domain. Digitization Muthulakshmi Research Academy

ब्राह्मतीर्थेन देवतीर्थेन वा आचमनं कार्यं नतु पितृतीर्थेन इति तस्य भावः। तत्र हस्ते तीर्थस्थानानि स्वयमेव आह मनुः– **अङ्गुष्ठमूलस्य तले ब्राह्मतीर्थं प्रचक्षते ।**

कायमङ्गुलिमूलेऽग्रे देवं पित्र्यं तयोरधः।।

आचमनं कियत्परिमाणं भवेदिति मनुः प्रमाणं दर्शयति–

हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।

वैश्याद्भिः प्राश्तिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः।। इति । अस्य भावः– विप्रः हृदयपर्यन्तगामि वारिभिः पुनीतो भवति, आचमनं जलं हृदयपर्यन्तं गच्छेत्। क्षत्रियस्य कण्ठं यावत्, वैश्यस्य मुखपर्यन्तं शूद्रस्य तु केवलम् ओष्ठपरिमितमाचमनजलं स्पृशेत् इति। एवं प्राणायामादिविषयानपि सप्रमाणं प्रतिपादयन्ति।

इत्थं साग्निकार्यं सन्ध्यामुपासीत ।।

एवं कृतोपनयनादियथायोग्यसंस्काराः बालाः अध्ययनाय गुरुकुलं व्रजेयुः। गुरुशुश्रूषां विना न खलु विद्या सिध्यति। गुरुसन्निधौ यावत् अध्ययनसमाप्तिः न भवति तावत् गुरुशुश्रूषां चरन् तत्रैव वसेत्।

तदाह मनुः – **"षट्त्रिंशदाब्धिकं चर्यां गुरौ त्रैवैदिकं व्रतम्।**

तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा।" इति।

अष्टमवर्षात् आरभ्य षट्त्रिंशततमवर्षपर्यन्तं गुरुकुले भवेत्। अथवा तदर्धं अष्टादशवर्षाणि, अशक्तौ तदर्धं नव वर्षाणि वा ब्रह्मचर्येण गुरुशुश्रूषया भैक्षचर्येण च इन्द्रियनिग्रहवान् सन् वसेत्। तत्र ब्रह्मचर्यं त्रिविधं भवति। तथा च छान्दोग्योपनिषदि –

पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि तत् प्रातःसवनं , चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोऽन्यगान्यत्ताः प्राणाः वाव वसन एते हीदँ सर्वं वासयन्ति। (3-16-1-6)

तत्रायमर्थः– त्रिः प्रकारकं ब्रह्मचर्यं भवति। कनिष्टमध्यमउत्तमश्चेति । कनिष्टप्रकारकं ब्रह्मचर्यमत्र मन्त्रे निरूपितम् – यः पुरुषः **पुरि शेते** इति व्युत्पत्या पुरि देहे शेते वसति इति पुरुषः –जीवात्मा सः यज्ञः नाम शुभगुणयुक्तः सत्कर्म चरेत्। यावत् पर्यन्तं इत्यत आह– चतुर्विंशिति वर्षाणि इति। तथा च चतुर्विंशतिः वर्षाणि यावत् जितेन्द्रियः ब्रह्मचारी सन् वेदादिग्रहणं अन्यशिक्षादिकञ्च अभ्यस्येत्। विवाहानन्तरमपि तादृशाचरणमनुवर्तनीयं भवति। एवं तत्र षट्सु मन्त्रेषु निरूपितं वर्तते । तथाच ब्रह्मचर्यं चरन्नेव अभ्यस्येदिति फलितार्थः।

पठन पाठन विधिः – एवम्, 'ऋतं च स्वाध्याय प्रवचने च, सत्यञ्च स्वाध्यायप्रवचने च, तपश्च स्वाध्यायप्रवचने च दमश्च स्वाध्यायप्रवचने च, शमश्च स्वाध्यायप्रवचने च' इत्यादितैत्तरीयोक्तदिशा यथार्थाचरणं कुर्वन् स्वाध्याय प्रवचनं चरेत्। सत्यवादी सदाचारः सन्नध्ययनं कुर्वीत। अथ तपस्वी धर्मानुष्ठानरतः सन् प्रवचनाध्ययने आचरेत्। दमो इन्द्रियनिग्रह इति गीतोक्तदिशा दुराचारेभ्यः इन्द्रियान् पराङ्मुखीकुर्वन्, शमेन – "शमो मन्निष्ठता बुद्धिः" इति एकाग्रचित्तः भूत्वा परमेश्वरे लग्नमनः सन् स्वाध्यायप्रवचनादिकं चरेत् । अपि च "अहिंसा सत्यमस्तेयब्रह्मचर्यपरिग्रहरूपयमी" "शौच–सन्तोष–तपः–स्वाध्याय–ईश्वरप्रणिधान" रूप योगशास्त्रोक्तनियमसम्पन्नःसन् अधीयीत। यतो हि एतादृशक्रमानुगुणेन कृतविद्यायाः एव साफल्यं भवति। यथा आह

मनुः– **"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।**

In Public domain. Digitization Muthulakshmi Research Academy

चत्वारि तस्य सिध्यन्ति आयुः विद्या यशो बलम्" ।। इति। (2-121)

पाठन विषयाः – उक्तसमस्तयमनियमसम्पन्नः सदाचारी गुरुशुश्रूषारतः च बालः गुरुकुले किं वा पठेत्? अध्ययनविषयाः के भवेयुः इत्यस्मिन् विषये यदुक्तं स्वामिपादैः तदत्र किंचित् पर्यालोचयामः – तत्र प्रथमं शिक्षा पठनीया – या च सूत्ररूपा । यत्र अक्षराणां स्थानप्रयत्नादि निरूपितम्। यथा – "अकुहविसर्जनीयः कण्ठ्यः" इत्यादि स्थानविषयकाणि, "स्पृष्टं प्रयत्नं स्पर्शाणाम्" इत्यादि प्रयत्नविषयाः च निरूपिताः । तदादौ अभ्यस्येत्।

व्याकरणम् – "वृध्दिरादैच्" इत्यादि पाणिनिप्रभृतिभिः कृतं व्याकरणं सार्थं पठनीयम्।ततः धातुपाठं लकारादि निष्पत्तिप्रक्रिया सहितं पठेत् । तथैव उणादिपाठं पठेत्। दयानन्दसरस्वत्या रचितानि व्याकरणसम्बद्धपुस्तकानि अपि सन्ति।तदनु महाभाष्यं अभ्यस्येत् । एवं विद्यार्थी सार्धैकवर्षे अष्टाध्यायीं पुनश्च सार्धैकवर्षे महाभाष्यं पठेत् । तथा च त्रिषु वर्षेषु व्याकरणं परिसमाप्येत।

निरुक्तम् – व्याकरणपठनानन्तरं यास्कादिमुनिकृतनिघण्टुनिरुक्तादिकं षडष्टसु मासेषु पूरयेत्।। नास्तिकादिजनैः कृतकोषादिपठने कालं न यापयेत्।

छन्दः – तदनन्तरं पिङ्गलाचार्यादिकृतछन्दोग्रन्थः पठनीयः येन लौकिकवैदिकछन्दसां परिचयो भवति। तथा नवीनरचनानां रीतिः अपि शिक्षेत।।

ततः वर्षं यावत् मनुस्मृतिं, वाल्मीकीयरामायणं, महाभारतं तत्रापि विदुरनीतिसदृशान् भागान् सम्यग् अधीयीत येन बुद्धेः विकासः यथा मनसः नैर्मल्यञ्च वर्धेत। अहिंसा सत्यमक्रोधाः सद्गुणाः हृदि पूर्यन्ते। ततः षट्सु वर्षेषु ऐतरेय–शतपथ–साम–गोपथसंज्ञकान् ब्राह्मणान्, चतुरः वेदान् च सार्थमभ्यस्येत्। यः खलु वेदं केवलं स्वरपाठमात्रं पठति सः यथा वृक्षः केवलं फलपत्रादिभारान् वहति तथा भारवाहः एव भवति। यः अर्थानुसन्धानपूर्वकं पठति स ब्रह्मानन्दम् अनुभवतीति वर्णितं निरुक्ते – "स्थाणुरयं भारवहः" (1-18) यः विद्वान् भवति स एव वेदस्य स्वरूपं ज्ञास्यति न पुनः मूर्खः। यथा ऋग्वेदे –

"उत त्वं पश्यन्नददर्श वाचमुत त्वं शृण्वन्नशृणोत्येनाम्।
उतो त्वस्मै तन्व ! वि सस्रे जायेव पत्य उशती सुवासाः"। इति।

ततः धनुर्वेदः, राज्यसम्बन्धिशास्त्राणि वर्षद्वये पठनीयानि। ततः गन्धर्वविद्या, नृत्यगीतादिः अर्थः, शिल्पविद्या, हस्तसामुद्रिकादिग्रन्थाः, ये के च महर्षिप्रणीताः भवन्ति तान् पठेत्। इत्थं साङ्गवेदान् पठेत्।

शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुः मनीषिणः।।

तथा च अवश्यं पठनीयग्रन्थानाम् आवलिः इत्थं भवति–

- ऋग्यजुसामाथर्ववेदाः
- ऐतरेयशतपथसामगोपथब्राह्मणाः
- शिक्षा, व्याकरणम्, निघण्टुः, निरुक्तम्, छन्दः, ज्योतिषम् – षट् वेदाङ्गाः।

In Public domain. Digitization Muthulakshmi Research Academy

- मीमांसादि षट् शास्त्राणि ।
- आयुर्वेदः, धनुर्वेदः, गान्धर्वम्, अर्थवेदः – 4 उपवेदाः।

एवं प्राचीनैः मुनिजनैः ज्ञानिभिः प्रणीताः ग्रन्थाः एव पठनीयाः न पुनः अन्यग्रन्थाः। तत्रापि यदि वेदविरुद्धं लक्ष्यते तत् सर्वथा त्याज्यम्।

बालिकाः अपि अध्ययनं कुर्युः इति एते प्रतिपादयन्ति। **ब्रह्मचर्य्येण कन्या युवानं विन्दते पतिम्** (अथर्व–3. प्र. 24)

यथा बालकः ब्रह्मचर्येण कृतवेदविद्यः सन् स्वानुकूलां प्रियां प्राप्नोति तथा विदुषी कन्या कृताध्ययना स्वानुगुणं पतिं प्राप्नोति इति एते वेदप्रामाण्येन प्रतिपादयन्ति। इदानींतनदिवसेषु स्त्रियः सर्वेषु क्षेत्रेषु कृतभूरिपरिश्रमाः सफलाः दृश्यन्ते इति तु सर्वविदितमेव। अपि च स्वामिपादानां यदध्ययनमार्गदर्शनं अस्ति तेन मार्गेण यदि अध्ययनं क्रियते तदा अस्मिन् सङ्गणकयुगे संस्कृतसाहित्यस्य उद्धारः निस्संशयं भवति इति मे विश्वासः।

एवं च श्री. स्वामिदयानन्दसरस्वतिमहाभागाः अस्माकं कृते अध्ययनमार्गदर्शनं कुर्वन् प्राचीनविद्यायाः महत्त्वमपि प्रतिपादयन्ति। एतादृशं समाजोपयोगिकार्यं कुर्वाणाः इमे सर्वैः वन्दनीयाः भवन्ति।

****

In Public domain. Digitization Muthulakshmi Research Academy

